श्री आत्मानन्द-ग्रन्थरत्नमाला-सप्तत्रिंशं रत्नम्. (३७)

श्रीरत्नशेखरसूरिविरचितस्वोपज्ञविवृतिसहितं

गुरुगुणषट्त्रिंशत्षट्त्रिंशिकाकुलकम् ॥

न्यायाम्भोनिधिश्रीमद्विजयानन्दसूरिशिष्यप्रवर्त्तकश्रीमत्कान्तिविजयमुनिपुङ्गवशिष्यमुनिश्रीचतुरविजयसंशोधितम् ॥

न्यायाम्भोनिधिश्रीमद्विजयानन्दसूरिप्रशिष्यश्रीमद्हंसविजयमुनिपुङ्गवशिष्यश्रीदोलतविजयोपदिष्टमङ्गलपुर (माङ्गरोल)-
वास्तव्यश्रीमालिज्ञातीय-श्रेष्ठि-उत्तमचन्द्र-तनूज-सोमचन्द्र-द्रव्यसाहाय्येन—

प्रकाशयित्री—भावनगरस्था-जैन आत्मानन्दसभा.

इदं पुस्तकं भावपुर्यां, वल्लभदास त्रिभुवनदास गांधी सेक्रेटरी जैन आत्मानन्दसभा इत्यनेन
आनंदमुद्रालये श्रीमल्लुभाई-सूनु-गुलाबचन्द्रद्वारा मुद्रयित्वा प्रकाशितम् ।

वीरसंवत्-२४४१. आत्मसंवत्-१९. विक्रमसंवत्-१९७१.

Published by Vallabhadas Tribhovandas Gandhi, Secretary Shri Jain Atmanand Sabha, Bhavnagar
and Printed by G. L Shah at the Anand Printing Press—Bhavnagar.

॥ अर्हम् ॥

॥ गुरुगुणषट्त्रिंशत्षट्त्रिंशिकाप्रस्तावना ॥

इह किल केवलज्ञानापूर्वलोचनावलोकिताखिललोकालोकमध्यवर्त्तिपदार्थसार्थैर्लौकिकदेवातिशायिसहजातिशयसंपत्संभारभासुरैः सतताखण्डनिदेशाखण्डलश्रेणिसंसेवितपादारविन्दैः श्रीमद्देवाधिदेवैः त्रिभुवनवर्त्तिसमग्रजन्तुजातनिःसीमपरोपकृतिकरणाय समस्तप्रवचनोपनिपद्भूतं अर्हत्सिद्धाचार्योपाध्यायसाधुदर्शनज्ञानचारित्रतपोरूपं पदनवकं समुपदिष्टम् । तत्र तृतीयपदवर्त्तिनां जिनशासनप्रोत्तुङ्गप्रासादशिखरकलशारोपणप्रवीणानां संख्यातीतानवगीतगुणगणगरीष्ठानां श्रीमदाचार्याणां गुणोत्कीर्त्तनं कर्तुकामैराचार्यैः समयसुधाम्बुधेः पृषन्मात्रं समादायेदं स्वोपज्ञदीपिकाह्वविवृतिसमलङ्कृतं गुरुगुणषट्त्रिंशत्पट्त्रिंशिकाभिधानं कुलकं विरचितमिति कुलकगतस्य—

"जइवि हु सूरिवराणं, सम्मं गुणकित्तणं करेउं जे । सक्कोवि नेव सक्कइ, कोऽहं पुण गाढमूढमई ॥ ३८ ॥

तहवि हु जहा सुआओ, गुरुगुणसंगहमयाउ भत्तीए । इय छत्तीसं छत्तीसियाउ भणियाउ इह कुलए ॥ ३९ ॥

इत्येतदार्याद्वयस्यावलोकनेन स्फुटमेवावगम्यते ।

अस्य सदीपिकाकुलकस्य के कर्त्तारः? इति जिज्ञासायां जातायां कुलकावसानगतायाः—

"सिरिवयरसेणसुहगुरु–सीसेणं विरइयं कुलगमेयं । पढिऊणमसढभावा, भव्वा पावंतु कल्लाणं ॥ ४० ॥"

इत्येतद्गाथाया अवलोकनन, तथा विवृतिप्रान्तोपन्यस्तप्रशस्त्याम्—

“ श्रीमद्बृहद्गच्छपयोजहंसः, समस्तवादीन्द्रशिरोऽवतंसः । प्रज्ञापराभूतसुरेन्द्रसूरिर्जीयाज्जगत्यां गुरुदेवसूरिः ॥ १ ॥

तद्गच्छे स्वच्छमनाः, समजनि जयशेखरो गुरुः श्रीमान् । तत्पट्टगगनभानुः, सूरिः श्रीवज्रसेनाह्वः ॥ २ ॥

तत्पट्टनायकाः श्रीहेमतिलकसूरयस्तदादेशात् । श्रीरत्नशेखराख्यः, शिष्यो लिखति स्म विवृतिमिमाम् ॥ ३ ॥”

इत्येतत्पद्यत्रयस्य च निर्वर्णनेन बृहद्गच्छालङ्कारहारोपमवादीन्द्रचूडामणिश्रीमद्देवसूरिसन्तानीयश्रीजयशेखरसूरिशिष्यश्रीवज्रसेनसूरीणां शिष्याः श्रीहेमतिलकसूरिपट्टप्रतिष्ठिताः श्रीरत्नशेखरसूरय एवास्य प्रणेतार इति प्रकटमेवावसीयते ।

अस्य सविवृतिकुलकस्य प्रणेतारः कस्मिन् कालेऽभूवन्? इति जिज्ञासायां जातायां यद्यपि प्रकरणकारैरस्मिन् प्रकरणे साक्षात् स्वसत्तासमयः क्वापि नोपनिबद्धः तथाऽपि एतन्मुनिनायकनिर्मितप्राकृतश्रीपालकथाऽवसानगतायाः—

“ तस्सीसहेमचंदेण साहुणा विक्कमस्स वरिसम्मि । चउदसअट्ठावीसे, लिहिया गुरुभत्तिकलिएणं ॥ ४२ ॥”

इत्येतद्गाथाया अवलोकनेन विक्रमादित्यसंबन्धिचतुर्दशशतोपर्यष्टाविंशतितमे वर्षे प्रथमादर्शे लिखितत्वेन सूरिशेखराणाममीषां सत्तासमयोऽपि वैक्रमीये पञ्चदशे शते निर्विरोधं निर्णीयते । यद्यपि स्वोपज्ञश्राद्धविधिश्रावकप्रतिक्रमणसूत्रवृत्त्याचारप्रदीपाद्यनेकग्रन्थस्य कर्तारः श्रीमद्रत्नशेखरसूरय एतत्कुलकविवृतिकारानन्यसमयसत्ताकास्तथापि अनन्तरोक्तग्रन्थप्रशस्तौ बृहत्तपागच्छनायकश्रीमन्मुनिसुन्दरसूरीश्वराणां शिष्यत्वेन निरूपणात् प्रस्तुतकुलकविवृतिकारेभ्यो भिन्ना एवेति स्फुटमवगम्यते।

एतन्मुनिपतिनिर्मितावुक्तव्यतिरिक्तौ स्वोपज्ञविवृतिसमलङ्कृतौ गुणस्थानक्रमारोहक्षेत्रसमासौ दृश्येते, परमेतन्महाशय-

प्र

।

विरचिता अपरे ग्रन्थरत्ना भवेयुर्न वेति तेषां दृष्टश्रुताद्यभावेन निर्णेतुं न शक्यते ।

अस्य विषयविवेचनं तु पृथक् संपादितमस्ति, तस्मात्तदर्थिना तदवलोकनीयम् ।

अस्य संशोधनसमये द्वे पुस्तके अ–क–संज्ञके पत्तनीयसङ्घस्य पुस्तकभाण्डागारसत्के पुरातने षड्विंशतिपञ्चविंशतिपत्रात्मके, एकं पुनः व–संज्ञकं प्रज्ञांसश्रीमद्वीरविजयमुनिसत्कं पुरातनं अष्टात्रिंशत्पत्रात्मकम्, एकं तु ड–संज्ञकं भावनगरीयसङ्घस्य चित्कोशसत्कं पुरातनं त्रयोदशपत्रात्मकम्, एकं च प्रवर्त्तकश्रीमत्कान्तिविजयमुनिपुङ्गवसंबन्धि नूतनं एकोनत्रिंशत्पत्रात्मकम्, इत्येवंरूपाणि पञ्च पुस्तकानि समुपलब्धानि, एतत्पुस्तकपञ्चकाधारेण संशोधनकर्मणि साहाय्यं समुपलभमानोऽहं पुस्तकसमर्पणोदाराणाममीषां महाशयानां, प्रेसकोपीनिरीक्षणेन साहाय्यं वितन्वतः पन्यासश्रीमदानन्दसागरस्यापि परोपकृतिं स्मृतिगोचरतां नयामि ।

पूर्वोक्तपुस्तकाधारेण महता प्रयासेन संशोधितेऽप्यत्र निबन्धेऽस्मद्दृष्टिदोषेणाक्षरयोजकदोषेण वा यत्र क्वचनाशुद्धिः कृता जाता वा भवेत्तत्र संशोधनीयं सदयहृदयैः संविज्ञगीतार्थैरिति प्रार्थयते—

चन्द्रर्ष्यङ्केलाब्दे, वैशाखसितप्रतिपदि गुरुवारे ।
चतुरविजयेन पत्तननगरे प्रस्तावना दृब्धा॥ १॥

न्यायाम्भोनिधिश्रीमद्विजयानन्दसूरीश्वर-
शिष्यप्रवर्त्तकश्रीमत्कान्तिविजयचरणचञ्चरीकः
चतुरविजयो मुनिः॥

॥ अर्हम् ॥

॥ गुरुगुणषट्त्रिंशत्षट्त्रिंशिकाविषयानुक्रमणिका ॥

॥ चतुर्थषट्त्रिंशिकाविषयोपक्रमः ॥

॥ पञ्चमीषट्त्रिंशिकाविषयोपक्रमः ॥

॥ षष्ठीषट्त्रिंशिकाविषयोपक्रमः ॥

॥ सप्तमषट्त्रिंशिकाविषयोपक्रमः ॥

॥ अष्टमषट्त्रिंशिकाविषयोपक्रमः ॥

॥ नवमषट्त्रिंशिकाविषयोपक्रमः ॥

॥ दशमीषट्त्रिंशिकाविषयोपक्रमः ॥

॥ एकादशीषट्त्रिंशिकाविषयोपक्रमः ॥

॥ द्वादशीषट्त्रिंशिकाविषयोपक्रमः ॥

॥ त्रयोदशीषट्त्रिंशिकाविषयोपक्रमः ॥

॥ चतुर्दशीषट्त्रिंशिकाविषयोपक्रमः ॥

॥ पञ्चदशीषट्त्रिंशिकाविषयोपक्रमः ॥

॥ षोडशीषट्त्रिंशिकाविषयोपक्रमः ॥

॥ सप्तदशीषट्त्रिंशिकाविषयोपक्रमः ॥

॥ अष्टादशीषट्त्रिंशिकाविषयोपक्रमः ॥

॥ एकोनविंशतितमीषट्त्रिंशिकाविषयोपक्रमः ॥

॥ विंशतितमीषट्त्रिंशिकाविषयोपक्रमः ॥

६

॥ एकविंशतितमीषट्त्रिंशिकाविषयोपक्रमः ॥

॥ द्वाविंशतितमीषट्त्रिंशिकाविषयोपक्रमः ॥

॥ त्रयोविंशतितमीषट्त्रिंशिकाविषयोपक्रमः ॥

॥ चतुर्विंशतितमीषट्त्रिंशिकाविषयोपक्रमः ॥

॥ पञ्चविंशतितमीषट्त्रिंशिकाविषयोपक्रमः ॥

॥ षड्विंशतितमीषट्त्रिंशिकाविषयोपक्रमः ॥

॥ सप्तविंशतितमीषट्त्रिंशिकाविषयोपक्रमः ॥

॥ अष्टाविंशतितमीषट्त्रिंशिकाविषयोपक्रमः ॥



॥ अर्हम् ॥

॥ न्यायाम्भोनिधिश्रीमद्विजयानन्दसूरीश्वरेभ्यो नमः ॥

श्रीमद्रत्नशेखरसूरिकृतस्वोपज्ञदीपिकया विवृत्त्या समेतं

गुरुगुणषट्त्रिंशत्षट्त्रिंशिकाकुलकम् ।

श्रीमदर्हत्पदं जीयात्, महोदयमहोज्ज्वलम् । जगत्त्रितयसाम्राज्यं, यत्प्रसादर्द्धिवर्णिका ॥ १ ॥

कलाकुलनयज्ञान–संपद्विस्तारकारकः । श्रीयुगादिजिनो भूयाद्, भविनां भूरिभूतये ॥ २ ॥

भूर्भुवःस्वस्त्रयीशार्च्यः, कल्याणार्णवचन्द्रमाः। निरस्ताशेषदोषः श्री–शान्तिः शान्तिं तनोतु वः॥ ३ ॥

स श्रीनेमिजिनो जीयात्, श्यामलाऽपि यदङ्गरुक् । सुधाञ्जनशलाकेव, सुदृशां दृग्विशुद्धये ॥ ४ ॥

यन्नामस्मृतिमात्रेण, मनोऽभीष्टार्थसिद्धयः। प्राणिनां स्युः सदा स श्री-पार्श्वनाथोऽस्तु वः श्रिये ॥ ५ ॥

सर्वज्ञोऽतिशयश्रीमान्, प्रातिहार्यैरलंकृतः । वर्धमानो जिनो भूयाद्, वर्द्धमानसमृद्धये ॥ ६ ॥
श्रीमन्तोऽजितनाथाद्याः, सर्वेऽन्येऽपि जिनेश्वराः । सन्तु श्रेयःश्रियः सिद्ध्यै, वृद्ध्यै च सुखसंपदाम् ॥७॥
अहंपूर्विकया सर्वा, यं सेवन्ते सुलब्धयः । स गुरुर्गौतमो मे स्ताद्, अद्भुताभीष्टलब्धये ॥ ८ ॥
अर्हद्भिःसरसीभवं गणधरादित्यप्रभोद्भासितं, त्रैलोक्येश्वरषट्पदैरविरतं चाघ्रातसारं मुदा ।
हस्ताद् दृष्टिपथान्मुखाच्च मुनिभिर्नित्यं न यन्मुच्यते, तज्जैनागमपङ्कजं मम मनोहंसस्य भूयान्मुदे ॥९॥

श्रीशारदा शारदशर्वरीश–विभाभिरामोज्ज्वलकायकान्तिः ।
ममोज्ज्वलध्यानपथावतीर्णा, वर्णानुपूर्वी विमलां तनोतु ॥ १० ॥
श्रीवज्रसेनाभिधसूरिराजैः, सुसूत्रधारैरिव यैर्व्यधायि ।
अयं जनोऽप्यश्मसमोऽभिवन्द्य–स्तेभ्यो गुरुभ्योऽस्तु मम प्रणामः ॥ ११ ॥

एवं देवगुरुभ्यः, कृतप्रणामोऽहमल्पबुद्धिरपि । विवृणोमि सुगुरुगुणषट्–त्रिंशत्षट्त्रिंशिकाकुलकम् ॥१२॥

इह हि शिष्टसमयानुसारतो मङ्गलार्थमभीष्टदैवतनमस्काराविर्भाविकां संबन्धादिगर्भा च सूत्रस्येमामादिगाथामाह—

१ क–पुस्तके " जीयाद् " ॥

वीरस्स पए पणमिय, सिरिगोयमपमुहगणहराणं च। गुरुगुणछत्तीसीओ, छत्तीसं कित्तइस्सामि ॥१॥

व्याख्या—वीरस्य पादौ प्रणम्य गुरुगुणषट्त्रिंशिकाः षट्त्रिंशत्संख्याकाः कीर्तयिष्यामीति संटङ्कः । तत्र विशेषेण ईरयति प्रेरयत्यष्टकर्माणीति वीरः। यदाह—"विदारयति यत्कर्म, तपसा च विराजते । तपोवीर्येण युक्तश्च, तस्माद्वीर इति स्मृतः ॥ १ ॥" तस्य च श्रीवीरस्य श्रीसिद्धार्थभूपालविशालकुलकमलमार्तण्डमण्डलस्य श्रीत्रिशलादेवीकुक्षिसरसीरुहराजहंसस्य बाललीलादलितमसर्पदर्पसुपर्वाखर्वगर्वावदातसंतुष्टाखिलाखण्डलाद्यमरवृन्दपरिकल्पितवीर इतिनामधेयस्य तीर्थाधिनाथस्य पादौ प्रणम्य; तथा श्रीगौतमप्रमुखगणधराणां च श्रीगौतमसद्गोत्रश्रीमादिन्द्रभूतिप्रभृत्येकादशगणनायकानां च। ते च इमे—'पढमित्थ इंदभूई, बीए पुण होइ अग्गिभूइत्ति। तइए अ वाउभूई, तओ विअत्ते सुहम्मे अ ॥१॥ मंडिअमोरियपुत्ते, अकंपिए चेव अयलभाया य। मेअज्जे अ पभासे, गणहरा हुंति वीरस्स ॥ २ ॥' एतेषां च पादौ प्रणम्य। एते च वक्ष्यमाणनिःशेषगुरुगुणानां आधारभूतत्वाद्विशेषतश्चात्र प्रणामार्हाः। तथा च "गृणाति सद्धर्मम्" इति गुरुः। स च गुणवानेव तत्त्वतो विशुद्धसम्यक्तत्त्वावबोधजनकसद्धर्मदेशनादिसमर्थो भवति। यदाह—"आयारे वट्टंतो, आयारपरूवणाअ संकंतो। आयारपरिब्भट्ठो, सोऽसुद्धपरूवणे भईओ ॥ १ ॥ गुणसुट्ठिअस्स वयणं, महुघयसित्तू व्व पावओ भाइ। गुणहीणस्स न रेहइ, नेहविहूणो जह पईवो ॥ २ ॥" अपि च—"वाङ्मात्रसाराः परमार्थवाह्या, न दुर्लभाश्चित्रकरा मनुष्याः।

---

१ वक्ष्यमाणा हि निरुक्तिरिति भविष्यति मध्यगता निरुक्तिदर्शिका पंक्तिर्नतूपलभ्यते पुस्तकद्वये इति निरुपाया संसद् भविष्यत्यन्यो वा सूरेरभिप्रायोऽगोचरो नः ॥

२ आचारे वर्तमान आचारप्ररूपणाया संक्रान्तः। आचारपरिभ्रष्टः अशुद्धप्ररूपणायां भाज्यः ॥ १ ॥ ३ ब-पुस्तके " चित्रक " ।

ते दुर्लभा ये जगतो हिताय, धर्मे स्थिता धर्ममुदाहरन्ति ॥ १ ॥ केचित् प्रवालमिव रञ्जभृतः स्वयं स्युः, केचिच्च चूर्णकणवत्परञ्जयोग्याः । कश्मीरजातमिव सौरभपूरगौरा, धन्याः पुनः स्वपररञ्जकतां भजन्ति ॥ २ ॥ आत्मप्रबोधविरहादविशुद्धबुद्धेरन्यप्रबोधनविधिं प्रति कोऽधिकारः । सामर्थ्यमस्ति तरितुं सरितो न यस्य, तस्य प्रतारणपरा परतारणोक्तिः ॥ ३ ॥" अतो गुणवानेव गुरुरालोक्यते । ते च गुणा ज्ञानदर्शनचारित्रादयो यद्यप्यमेयास्तथाऽपि षट्त्रिंशत्षट्त्रिंशत्संख्यया कलितानां कतिपयगुरुगुणानां याः षट्त्रिंशत्संख्याकाः षट्त्रिंशिकास्ताः कीर्तयिष्यामि ।

ननु किमित्येवं गुरुगुणाः कीर्त्यन्ते ? उच्यते, गुणवान् गुरुरेव संप्रति दुष्षमान्धकारसंभारतिरोहितसन्मार्गाणां प्राणिनां दीप्रप्रदीपकल्पत्वादनल्पगौरवार्हो भवति । यतः—"गुरुर्गौरवार्हो गुरूपक्रियातः, कलौ देवतोऽपीति सम्यग् मतिर्मे । तमिस्रातमिस्रापहारी कृशानु–र्बृहद्भानुरित्युच्यते किं न लोकैः ? ॥ १ ॥" अपि च—"यद्वत्सहस्रकिरणः, प्रकाशको निचिततिमिरमग्नस्य । तद्वद्गुरुरत्र भवेद्, अज्ञानध्वान्तपतितस्य ॥२॥" वाचकमुख्योऽप्याह–"दुष्प्रतिकारौ माता–पितरौ स्वामी गुरुश्च लोकेऽस्मिन् । तत्र गुरुरिहामुत्र च, सुदुष्करतरप्रतीकारः ॥ १ ॥ गुर्वायत्ता यस्मा–च्छास्त्रारम्भा भवन्ति सर्वेऽपि । तस्माद्गुर्वाराधनपरेण हितकांक्षिणा भाव्यम् ॥ २ ॥" इति गाथार्थः ॥ १ ॥

अथ यथोक्तगुरुगुणषट्त्रिंशत्षट्त्रिंशिकासु प्रथमषट्त्रिंशिकासूत्रगाथामाह—

चउविहदेसणकहधम्मभावणासारणाइकुसलमई । चउविहचउझाणविऊ, छत्तीसगुणो गुरू जयउ ॥२॥

---

१ अ–क–पुस्तके "देवतोऽपीति" ॥

व्याख्या—चतुर्विधासु देशनासु, चतुर्विधासु कथासु, चतुर्विधेषु धर्मेषु, चतुर्विधासु भावनासु, चतुर्विधासु स्मारणादिषु कुशला निपुणा मतिर्यस्येति स तथा। तथा प्रत्येकं प्रत्येकं चतुर्विधानि चत्वारि ध्यानानि वेत्तीति चतुर्विधचतुर्ध्यानविदिति षट्त्रिंशद्गुणो गुरुर्जयत्विति समासार्थः। व्यासार्थस्त्वयम्—तत्र चतुर्विधा देशना। यथा—आक्षेपिणी१ विक्षेपिणी२ संवेगिनी३ निर्वेदिनी४ चेति। उक्तं च—"अक्खेविणी अ विक्खे-विणी य संवेअणी तहा चेव। निव्वेअणिआ एसा, चउव्विहा देसणा होइ ॥ १ ॥ आयारं ववहारं, हेऊदिट्ठंत दिट्ठिवायाई। देसिज्जइ जीए सा, अक्खेविणिदेसणा पढमा ॥ १ ॥ परमयविऊहिं परमय-वयणेहिं जीइ परभयाउ जणो। विक्खेविज्जइ एसा, विक्खेविणिदेसणा वीआ ॥ २ ॥ उवसमविवेगसंवर-समयासंतोससंभवं सुक्खं। वण्णिज्जइ जीए सा, संवेअणिदेसणा तइआ ॥ ३ ॥ जरमरणरोगसोगा-इएहिं अइदारुणं भवसरूवं। पयडिज्जइ जीए सा, निव्वेअणिदेसणा तुरिया ॥ ४ ॥" तथा चतुर्विधा कथा। यथा—अर्थकथा, कामकथा, धर्मकथा, संकीर्णकथा चेति। यदुच्यते—"अर्थं कामं च धर्मं च, तथा संकीर्णरूपताम्। आश्रित्य वर्तते लोके, कथा तावच्चतुर्विधा ॥ १ ॥ सामादिधातुवादादि-कृष्यादिप्रतिपादिका। अर्थोपादानपरमा, कथाऽर्थस्य प्रकीर्तिता ॥ १ ॥ संक्लिष्टचित्तहेतुत्वात्, पापसंबन्धकारिका। तेन दुर्गतिवर्तिन्याः, प्रापणप्रवणा मता ॥ २ ॥ कामोपादानगर्भार्था, वयोदाक्षिण्यसूचिका। अनुरागेङ्गिताद्युत्था, कथा कामस्य वर्णिता ॥ ३ ॥ सा मलीमसकामेषु, रागोत्कर्षविधायिका। विपर्यासकरा तेन, हेतुभूतैव दुर्गतेः ॥ ४ ॥ दयादानक्षमाद्येषु, धर्माङ्गेषु प्रतिष्ठिता। धर्मोपादेयतागर्भा, बुधैर्धर्मकथोच्यते ॥ ५ ॥ सा

१ अ-ब-पुस्तके-" निर्वेदनी " ॥

शुद्धचित्तहेतुत्वात्, पुण्यकर्मविनिर्जरे[1] । विधत्ते तेन विज्ञेया, कारणं नाकमोक्षयोः ॥ ६ ॥ त्रिवर्गसाधनोपाय-प्रतिपादनतत्परा । याऽनेकरससारार्था, सा संकीर्णकथोच्यते ॥ ७ ॥ चित्राभिप्रायहेतुत्वा-दनेकफलदायिका । विदग्धताविधानेन, हेतुभूतैव सद्गतेः ॥ ८ ॥" तथा चतुर्विधो धर्मः । यथा—दानधर्मः १, शीलधर्मः २, तपोधर्मः ३, भावधर्मः ४ चेति । तत्र दानधर्मस्त्रिधा—ज्ञानदानम् १, अभयदानम् २, धर्मोपष्टम्भदानम् ३ च । तत्र ज्ञानदानं यथा—"जीवाजीवाइपय-त्थवित्थरं उभयलोअकरणिज्जं । जेणं जाणंति जणा, तद्दाणं नाणदाणंति ॥ १ ॥" अभयदानं यथा—"जं सुहुमवायराणं, जीवाण ससत्तिओ सयाकालं । कीरइ रक्खणजयणा, तं जाणह अभयदाणंति ॥ १ ॥" धर्मोपष्टम्भदानं यथा—"जं धम्मसाहगाणं, साहूणं असणवसणमाईणि । दिज्जंति सुपत्ताणं, धम्मोवट्ठंभदाणमिणं ॥ १ ।" अथ शीलमपि त्रिधा—सदाचारशीलं१, अष्टादशसहस्रशीलाङ्गलक्षणं२, ब्रह्मव्रतपालनरूपं३ च । यदुच्यते—"सुद्धं समायारमनिंदणिज्जं, सहस्सअट्ठारसभेअभिन्नं । बंभाभिहाणं च महव्वयंति, सीलं तिहा केवलिणो वयंति ॥ १ ॥" अथ तपः, तद् द्विविधम्—बाह्यम्, अभ्यन्तरं २ च । यथा—"अणसणमूणोयरिया, वित्तीसंखेवणं रसच्चाओ । कायकिलेसो संली-णया य बज्झो तवो होइ ॥ १ ॥ पायच्छित्तं विणओ, वेयावच्चं तहेव सज्झाओ । झाणं उस्सग्गोऽविय, अब्भिंतरओ तवो होइ ॥ २ ॥" कैश्चित्तपस्त्रिविधं शारीरादिभेदमप्युच्यते, यथा—"देवातिथिगुरुप्राज्ञपूजनं शौचमार्जवम् । ब्रह्मचर्यमहिंसा च, शारीरं तप उच्यते ॥ १ ॥ अनुद्वेगकरं वाक्यं, सत्यं प्रियं हितं च यत् । स्वाध्यायाभ्यसनं चैव, वाङ्मयं तप उच्यते ॥ २ ॥ मनःप्रसादः सौम्यत्वं,

---

१ विनिर्जरम् ॥

मौनमात्मविनिग्रहः। भावसंशुद्धिरित्येतत्, मानसं तप उच्यते ॥ ३ ॥ शारीराद्वाङ्मयं सारं, वाङ्मयान्मानसं शुभम्। जघन्यमध्य-मोत्कृष्ट-निर्जराकारणं तपः ॥ ४ ॥ " अथवा सात्त्विकं १ राजसं २ तामसं३ इति त्रिधा । यथा—" श्रद्धया परया तप्तं, तपस्तत्त्रिविधं नरैः । अफलाकाङ्क्षिभिर्युक्तैः, सात्त्विकं परिचक्षते ॥ १ ॥ सत्कारमानपूजार्थं, तपो दम्भेन चैव यत् । क्रियते तदिह प्रोक्तं, राजसं चलमध्रुवम् ॥ २ ॥ मूढग्राहेण यच्चात्म-पीडया क्रियते तपः । परस्योच्छेदनार्थं वा, तत्तामसमुदाहृतम् ॥ ३ ॥ " अथ भावधर्म उच्यते, स च क्षायोपशमिकादिकशुभलेश्यापरिणामविशेषादानादौ सर्वत्र स्वारसिकः चित्तस-मुल्लास एव भावधर्म उच्यते । यदाह—" दाने शीले तपसि च, यत्स्वारसिको मनःसमुल्लासः । शुभलेश्यानन्दमयो, भवत्सरौ भावधर्म इति ॥ १ ॥ " विपर्यासे तु न धर्मः । यतः—" ज्ञाने ध्याने दाने, मौने माने सदोद्यतो भवतु । यदि निर्मलो न भाव—स्तदा फुलं भस्मनि समग्रम् ॥ १ ॥ " अपि च—" घनं दत्तं वित्तं जिनवचनमभ्यस्तमखिलं, क्रियाकाण्डं चण्डं रचितमवनौ सुप्तमसकृत् । तपस्तीव्रं तप्तं चरणमपि चीर्णं चिरतरं, न चेच्चित्ते भावस्तुषवपनवत्सर्वमफलम् ॥१॥ " अपि च—" ज्वालाभिः शलभा जलैर्जलचराः स्फूर्जज्जटाभिर्वटा, मौण्ड्यैरूरणकाः समस्तपशवो नाग्न्यैः खरा भस्मभिः । कष्टाङ्गीकरणैर्द्रुमाः शुकवराः पाठैर्बका ध्यानकैः, किं सिद्ध्यन्ति न भावशुद्धिविकलाः स्युश्चेत् क्रियाः सत्फलाः ॥ १ ॥" चतस्रो भावनाः । यथा—ज्ञानभावना, दर्शनभावना, चारित्रभावना, वैराग्यभावना, चेति । तथा चोच्यते—" भावनाभिरसंमूढो, मुनिर्ध्याने स्थिरीभवेत् । ज्ञानदर्शनचारित्र-वैराग्योपगताश्च ताः ॥१॥ वाच-

१ तीर्थङ्कराद्यवितुमाने ॥

ना पृच्छना सानु-प्रेक्षणं परिवर्तनम् । सद्धर्मदेशनं चेति, ज्ञातव्या ज्ञानभावना ॥२॥ संवेगः प्रशमः स्थैर्य-मसंमूढत्वमस्मयः । आस्तिक्यमनुकम्पेति, ज्ञेया सम्यक्त्वभावना ॥ ३ ॥ ईर्यादिविषयायत्ता, मनोवाक्कायगुप्तयः । परीसहसहिष्णुत्व-मिति चारित्रभावना ॥ ४ ॥ विषयेष्वनभिष्वङ्गः, कायतत्त्वानुचिन्तनम् । जगत्स्वभावचिन्तेति, वैराग्यस्थैर्यभावना ॥ ४ ॥" अथ चतस्रः स्मारणादिकाः । यथा—स्मारणा, वारणा, नोदना, प्रतिनोदना चेति । यदाह—"सारणा वारणा चेव, चोयणा पडिचोअणा । सीअंताणं सुसीसाणं, दायव्वा होइ सूरिणा ॥ १ ॥ पम्हट्ठे सारणा वुत्ता, अणायारस्स वारणा । चुक्काणं चोअणा भुज्जो, निट्ठुरं पडिचोअणा ॥ २ ॥ जहिं नत्थि सारणा वा-रणा य संचोअणा य गच्छंमि । सो गच्छोवि अग-च्छो, संजमकामीहिं मुत्तव्वो ॥ ३ ॥ जीहाएवि लिहंतो, न भद्दओ जत्थ सारणा नत्थि । दंडेणवि ताडंतो, स भद्दओ सारणा जत्थ ॥ ४ ॥" इत्येतेषु देशनाकथाधर्मभावनास्मारणादिपदेषु यथायोगं करणकारणोपदेशादिविधौ कुशलमतिर्गुरुर्भ-वतीति । अथ चतुर्विधानि चत्त्वारि ध्यानानि । यथा—आर्तध्यानं, रौद्रध्यानं, धर्मध्यानं, शुक्लध्यानं चेति । तच्च एकैकमपि चतुर्विधम् । तत्रार्त चतुर्धा । यथा—अनिष्टयोगार्त, इष्टनाशार्त, रोगार्त, निदानार्त चेति । यदाहुः श्रीजिनभद्रगणिक्षमाश्रम-णपादाः—" अमणुन्नाणं सद्दा-इविसयवत्थूण दोसमइलस्स । धणिअं विओगचिंतण-मसंपयोगाणुसरणं च ॥ १ ॥ इट्ठाणं विसयाई-ण वेअणाए अ रागरत्तस्स । अविओगज्झवसाणं, तह संजोगाभिलासो अ ॥ २ ॥ तह सूलसीस-रोगा-इवेयणाए वियोगपणिहाणं । तदसंपओगचिंतण, तप्पडिआराउलमणस्स ॥ ३ ॥ देविंदचक्कवट्टि-त्तणाइगुणरिद्धिपत्थ-

१ विस्मृते । २ भुयः स्खलितानाम् ॥ ३ अ-इ-क-पुस्तके " तह संपओग " इत्यपि ॥

णामइअं। अट्टमं नियाणचिंतण-मन्नाणाणुगयमच्चंतं ॥ ४ ॥ एअं चउव्विहं रा-गदोसमोहंकिअस्स जीवस्स। अट्टज्झाणं संसा-रवद्धणं तिरिअगइमूलं ॥५॥" रौद्रध्यानमपि चतुर्धा। यथा—हिंसानन्दरौद्रं १, मृषानन्दरौद्रं २, चौर्यानन्दरौद्रं ३, संरक्षणानन्दरौद्रं ४ चेति। तथा चाह—"सत्तवहवेहवंधण-डहणंकणमारणाइपणिहाणं। अइकोहग्गहघत्थं, निग्घिणमण-सोऽहमविवागं ॥ १ ॥ पिसुणासब्भूसब्भू-अभूयघायाइवयणपणिहाणं। मायाविणो अ संधण-परस्स पच्छिन्नपावस्स ॥२॥ तह तिव्वकोहलोहा-उलस्स भूओवघायणमणज्जं। परदव्वहरणचित्तं, परलोगावायनिरविक्खं ॥ ३ ॥ सद्दाइविसयसाहण-धणसंरक्खणपरायणमणिट्ठं। सव्वाभिसंकणपरो-वघायकलुसाउलं चित्तं ॥४॥ एअं चउव्विहं रा-गदोसमोहंकिअस्स जीवस्स। रुद्दज्झाणं संसा-रवद्धणं नरयगइमूलं ॥५॥" अथ धर्मध्यानं, तच्च त्रिभिः प्रकारैश्चतुर्धा—"मैत्र्यादिभिश्चतुर्भेदं, यद्वाऽऽज्ञादि चतुर्विधम्। रूपस्थादि चतुर्धा वा, धर्मध्यानं प्रकीर्तितम् ॥१॥" तत्र मैत्र्यादिभिश्चतुर्धा। यथा—मैत्री १, प्रमोदः २, कारुण्यं ३, माध्यस्थ्यं ४ चेति। यदाहुः श्रीहेमचन्द्रसूरिपादाः—"मैत्री प्रमोदकारुण्य-माध्यस्थ्यानि नियोजयेत्। धर्मध्यानमुपस्कर्तुं, तद्धि तस्य रसायनम् ॥ १ ॥ मा कार्षीत् कोऽपि पापानि, मा च भूत्कोऽपि दुःखितः। मुच्यतां जगदप्येषा, मतिर्मैत्री निगद्यते ॥ २ ॥ अपास्ताशेषदोषाणां, वस्तुतत्त्वावलोकिनाम्। गुणेषु पक्षपातो यः, स प्रमोदः प्रकीर्तितः ॥ ३ ॥ दीनेष्वार्तेषु भीतेषु, याचमानेषु जीवितम्। प्रतीकारपरा बुद्धिः, कारुण्यमभिधीयते ॥ ४ ॥ क्रूरकर्मसु निःशङ्कं, देवतागुरुनिन्दिषु। आत्मशंसिषु योपेक्षा, तन्माध्यस्थ्यमुदीरितम् ॥ ५ ॥" तथा आज्ञादिभिश्चतुर्धा। यथा—आज्ञाविचयः १, अपायविचयः

१ ड-पुस्तके 'एवं" इत्यपि ॥

२, विपाकविचयः ३, संस्थानविचयः ४ चेति। यदाह—"आज्ञाऽपायविपाकानां, संस्थानस्य च चिन्तनात्। इत्थं वा ध्येयभेदेन, धर्मध्यानं चतुर्विधम् ॥ १ ॥ आज्ञां यत्र पुरस्कृत्य, सर्वज्ञानामवाधिताम्। तत्त्वतश्चिन्तयेदर्थान्, तदाज्ञाध्यानमुच्यते ॥ २ ॥ रागद्वेषकषायाद्यै–र्जायमानान् विचिन्तयेत्। यत्रापायांस्तदपाय–विचयध्यानमिष्यते ॥ ३ ॥ प्रतिक्षणं समुद्भूतो, यत्र कर्मफलोदयः। चिन्त्यते चित्ररूपः स, विपाकविचयो मतः ॥ ४ ॥ अनाद्यन्तस्य लोकस्य, स्थित्युत्पादव्ययात्मनः। आकृतिं चिन्तयेद्यत्र, संस्थानविचयः स तु ॥ ५ ॥" अथ रूपस्थादि चतुर्धा। यथा—रूपस्थं १, पदस्थं २, पिण्डस्थं ३, रूपातीतं ४ चेति। यदवाचि—"रूपस्थं च पदस्थं च, पिण्डस्थं रूपवार्जितम्। धर्मध्यानं चतुर्भेद–मित्थं वा परिकीर्तितम् ॥ १ ॥ पश्यति प्रथमं रूपं, स्तौति ध्येयं ततः पदैः। तन्मयः स्यात्ततः पिण्डे, रूपातीतं ततो व्रजेत् ॥ २ ॥ यथाऽवस्थितमालम्ब्य, रूपं त्रिजगदीशितुः। क्रियते यन्मुदा ध्यानं, तद्रूपस्थं निगद्यते ॥ ३ ॥ स्वाध्याये यदि वा मन्त्रे, गुरुदेवस्तुतावपि। चित्तस्यैकाग्रता यत्त–त्पदस्थं ध्यानमुच्यते ॥ ४ ॥ नाभिपद्मादिरूपेषु, ध्यानं स्थानेषु योगिनाम्। यदिष्टदेवतादीनां, तत्पिण्डस्थं निगद्यते ॥५॥ निर्लेपस्य निरूपस्य, सिद्धस्य परमात्मनः। चिदानन्दमयस्य स्याद्, ध्यानं रूपविवर्जितम् ॥ ६ ॥" अथ शुक्लध्यानं चतुर्धा। यथा—पृथक्त्ववितर्कसप्रवीचारशुक्लं १, एकत्ववितर्काप्रवीचारशुक्लं २, सूक्ष्मक्रियाप्रतिपातिशुक्लं ३, व्यवच्छिन्नक्रियाप्रतिपातिशुक्लं ४ चेति। तत्स्वरूपं चेदम्—"एकत्रपर्ययाणां, विविधनयानुसरणं श्रुताद्द्रव्ये। अर्थव्यञ्जनयोगा–न्तरेष्वसंक्रमणमाद्यं तत् ॥१॥ एवं श्रुतानुसारा–देकत्ववितर्कमेकपर्यायम्। अर्थव्यञ्जनयोगा–न्तरेष्वं-

---

१ अ–ब–पुस्तके–" योगान्तरेषु सङ्क्र–" इत्यपि ॥

संक्रमणमन्यत्तु ॥ २ ॥ निर्वाणगमनसमये, केवलिनो दरानिरुद्धयोगस्य । सूक्ष्मक्रियाऽप्रतिपाति, तृतीयं कीर्तितं ध्यानम् ॥३॥ केवलिनः शैलेशी–गतस्य शैलवदकम्पनीयस्य । उच्छिन्नक्रियमप्रति–पाति तुरीयं परमशुक्लम् ॥४॥ एकं त्रियोगभाजा–माद्यं स्यादपरमेकयोगवताम् । तनुयोगिनां तृतीयं, निर्योगानां चतुर्थं च ॥ ५ ॥" इति षट्त्रिंशद्गुणयुतो गुरुर्जयत्विति सर्वोत्कर्षेण प्रवर्तताम् । इति गाथार्थः ॥ २ ॥

अथ द्वितीयषट्त्रिंशिकासूत्रगाथामाह—

पणविहसम्मचरणवय–ववहारायारसमिइसज्झाए । इगसंवेगे अ रओ, छत्तीसगुणो गुरू जयउ ॥३॥

व्याख्या—प्रत्येकं पञ्चविधेषु सम्यक्त्वचारित्रव्रतव्यवहाराचारसमितिस्वाध्यायेषु, एकस्मिंश्च संवेगे रतः, इति षट्त्रिंशद्गुणो गुरुर्जयत्विति संक्षेपार्थः । विस्तरार्थस्त्वयम्—पञ्चविधं सम्यक्त्वम् । क्षायिकं १, क्षायोपशमिकम् २, वेदकम् ३, औपशमिकं ४, सास्वादनं ५ चेति । यदुक्तम्—" खइअं १ खओवसमिअं २, वेअग ३ उवसामिअं ४ च सासणयं[1] ५ । पंचविहं सम्मत्तं, पन्नत्तं वीयरागेहिं ॥ १ ॥" एतद्भावनिका यथा—कृतत्रिपुञ्जस्य चतुर्थगुणस्थानकादारभ्य क्षपकत्वे प्रारब्धे अनन्तानुबन्धिचतुष्कस्य मिथ्यात्वमिश्रसम्यक्त्वरूपपुञ्जत्रयस्य च क्षये क्षायिकसम्यक्त्वं भवति । अप्राप्तपूर्वोऽध्यवसायविशेषोऽपूर्वकरणमुच्यते । तत्र कृतत्रिपुञ्जस्य जीवस्य उदीर्णमिथ्यात्वक्षये अनुदीर्णस्य चोपशमे क्षायोपशमिकं सम्यक्त्वं भवति । तेष्वेवानन्तानुबन्ध्यादिषु षट्सु क्षपितेषु सम्यक्त्वपुञ्जे च बहुतरे क्षपिते चरमग्रासीकृतसम्यक्त्वपुद्गलानां

---

१ अ-पुस्तके-" सासाण " इत्यपि ॥

वेदने वेदकसम्यक्त्वं भवति । तथा अपूर्वकरणेनैव कृतग्रन्थिभेदस्य उदीर्णे मिथ्यात्वे क्षीणेऽनुदीर्णे चाप्राप्तस्य अन्तरकरणे अन्तर्मुहूर्तं कालं सर्वथैव मिथ्यात्वावेदकस्य औपशमिकं सम्यक्त्वं भवति । उपशमश्रेणिं वा समारूढस्य मिथ्यात्वादीनामुपशमे सति औपशमिकं सम्यक्त्वं भवति । कस्यचिज्जीवस्य औपशमिकसम्यक्त्वात्प्रपततोऽनन्तानुबन्ध्युदयात् कलुपितस्यापि मिथ्यात्वमप्राप्तस्य वमनवद्गिरसतत्त्वरसास्वादनेन सास्वादनसम्यक्त्वं भवति। तथा चाह—“मिच्छाइखए खइओ,सोसत्तगि खीणि ठाइ वद्धाऊ । चउतिभवभाविमुक्खो, तब्भवसिद्धी उ (द्धिउ) इअरो उ ॥ १ ॥ अप्पुव्वकयतिपुंजो, मिच्छमुइण्णं खवित्तु अणुइन्नं । उवसामिय अनिअट्टी–करणाउ परं खओवसमी ॥ २ ॥ वेअगसम्मत्ती[1] पुण, कए दुपुंजक्खयंमि तइयस्स । खयकालचरमसमए सुद्धाणुअवेअणे[2] होइ ॥ ३ ॥ अकयतिपुंजो ऊसरदवईलियदड्ढरुक्खनाएहिं । अंतरकरणुवसमिओ, उवसमिओ[3] वा ससेणिगओ ॥ ४ ॥ उवसमअद्धाइ ठिओ, मिच्छमपत्तो तमेव गंतुमणो । संमं सासायंतो, सासायणिमो इमो होइ ॥ ५ ॥ अंतमुहुत्तोवसमो, छावलि सासाणु वेअगो समओ । साहिअतित्तीसायर, खइओ दुगुणो खओवसमो ॥ ६ ॥ उक्कोसं सासायण, उवसामिआ हुंति पंचवाराउ। वेअगखयगा इक्कसि, असंखवारा खओवसमो ॥ ७ ॥” तथा पञ्चविधं चारित्रम् । यथा——सामायिकं १, छेदोपस्थापनीयं २, परिहारविशुद्धिकं ३, सूक्ष्मसंपरायं ४, यथाख्यातं ५ चेति । यदुक्तम्—“सामाइय[4] त्थ पढमं, छेओवट्ठावणं भवे वीयं । परिहारविसुद्धीयं, सुहुमं तह संपरायं च ॥ १ ॥ तत्तो य अहक्खायं, खायं सव्वंमि जीवलोगंमि । जं चरिऊण सुविहिआ, वच्चंतयरामरं ठाणं ॥ २ ॥ सामा-

---

१ ड–पुस्तके “सम्मत्त.” । २ ड–पुस्तके ‘वेअगो” । ३ अ–न पुस्तके “खओवसमो” । ४ अ–पुस्तके “सामाइ इत्थ”॥

इयंमि उ कए, चाउज्जामं अणुत्तरं धम्मं । तिविहेणं फासंतो, सामाइयसंजओ स खलु ॥३॥ छित्तूणं परियागं, पोराणं जो ठवेइ अप्पाणं । धम्मंमि पंचजामे, छेओवट्ठावणो स खलु ॥४॥ परिहरइ जो विसुद्धं, पंचज्जामं अणुत्तरं धम्मं । तिविहेणं फासंतो, परिहारियसंजओ स खलु ॥५॥ लोभाणू वेअंतो, जो खलु उवसामओ व खवगो वा । सो सुहुमसंपराओ, अह-खाया ऊणओ किंचि ॥६॥ उवसंते खीणंमि व, जो खलु कम्मंमि मोहणिज्जंमि । छउमत्थो व जिणो वा, अहखाओ संजओ स खलु ॥ ७ ॥ " तथा व्रतानि साधूनां पञ्चैव प्राणातिपातमृषावादादत्तादानमैथुनपरिग्रहविरातिरूपाणि महाव्रतानि । य-दाह—" पाणिवहमुसावाए, अदत्तमेहुणपरिग्गहे चेव । सव्वनिवित्तीइ जई-ण हुंति पंचेव य वयाइं ॥ १ ॥ तसाणं थाव-राणं च, जं जीवाणमहिंसणं । तिविहेणावि जोगेणं, पढमं तं महव्वयं ॥ २ ॥ कोहलोहाइओ वावि, मुसावायस्स वज्जणं । तिविहेणावि जोगेणं, तं च वीयं महव्वयं ॥ ३ ॥ सुहुमं[1] वायरं वावि, परदव्वं नेव गिण्हइ । तिविहेणावि जोगेणं, तं च तइयं[2] महव्वयं ॥ ४ ॥ ओरालिअवेउव्विअ[3], परिवज्जेइ मेहुणं । तिविहेणावि जोगेणं, तं चउत्थं महव्वयं ॥५॥ धणधन्नाइव-त्थूणं, परिग्गहविवज्जणं । तिविहेणावि जोगेणं, पंचमं तं महव्वयं ॥ ६ ॥ " तथा व्यवहारपञ्चकम् । यथा—आगमव्यव-हारः १, श्रुतव्यवहारः २, आज्ञाव्यवहारः ३, धारणाव्यवहारः ४, जीतव्यवहार ५ श्चेति । यदाह—" आगम सुअ आणा धारणा य जीअं च होइ ववहारो । केवलि-मणोहि-चउदस-दस-नव-पुव्वाइ पढमित्थ ॥ १ ॥ आयारपकप्पाई, सेसं सव्वं सुअं विणिदिट्ठं । देसंतरट्ठिआणं, गूढपयालोअणा आणा ॥२॥ गीअत्थेणं दिण्णं, सोहिं अवधारिऊण तह चेव । दिंतस्स धारणा सा, उद्धिअपयधरणरूवा वा ॥ ३ ॥ दव्वाइ चिंतिऊणं, संघयणाईण हाणिमासज्ज । पायच्छित्तं जीयं, रूढं

१ व. पुस्तके-"सचित्ताचित्तवत्थूग, जमदिण्णाण दउजण"इत्यपि. २ व. पुस्तके-"तइय तं"इत्यपि. । ३ व. पुस्तके-"दिव्वमाणुस्सतोस्छिं, मेहुणस्स विवज्जणं"इत्यपि ॥

वा जं जहिं गच्छे ॥ ४ ॥ " तथा आचारः पञ्चधा । यथा—ज्ञानाचारः १, दर्शनाचारः २, चारित्राचारः ३, तपआचारः ४, वीर्याचार ५ श्चेति । यदाह—" नाणंमि दंसणंमि अ, चरणंमि तवंमि तहय विरियम्मि । आयरणं आयारो, इअ एसो पंचहा भणिओ ॥ १ ॥ " एतद्विस्तरः षष्ठ्यां षट्त्रिंशिकायां वक्ष्यति । तथा समितयः पञ्चधा । यथा—ईर्यासमितिः १, भाषासमितिः २, एषणासमितिः ३, आदाननिक्षेपणासमितिः ४, उच्चारादिपरिष्ठापनासमिति ५ श्चेति । यदाह—" इरिआसमिई भासा–समिई तह एसणाइ समिई य । आयाणाइपमज्जण–समिई परिठवण समिई य ॥१॥ जुगमित्तंतरदिट्ठी, पयं पयं चक्खुणा विसोहिंतो । अव्वक्खित्ताउत्तो, इरियासमिओ मुणी होइ ॥ २ ॥ कज्जे भासइ भासं, अणवज्जमकारणे न भासइ य । विगहविसुत्तिअपरिव–ज्जिओ अ जइ भासणासमिओ ॥ ३ ॥ बायालमेसणाओ, भोअणदोसे य पंच सोहेइ । सो एसणाइ समिओ, आजीवी अण्णहा होइ ॥ ४ ॥ पुव्विं चक्खुपरिक्खिअ, पमज्जिउं जो ठवेइ गिण्हइ वा । आयाणभंड-निक्खे–वणाइ समिओ मुणी होइ ॥५॥ उच्चारपासवणखे–लजल्लसिंघाणए अ पाणेविही । सुविवेइए पएसे, निसिरंतो होइ तस्समिओ ॥ ६ ॥ " तथा स्वाध्यायः पञ्चधा । यथा—वाचना १, पृच्छना २, परावर्तना ३, अनुप्रेक्षा ४, धर्मकथा ५ चेति । यदुच्यते—" वायण पुच्छण परिअ–ट्टणा य अणुचिंतणा य धम्मकहा । पंचविहो सज्झाओ, कायव्वो निज्जरट्ठाए ॥ १ ॥ " तद्विधिश्चैवम्—" पल्हत्थियमवट्ठंभं, तहा पायप्पसारणं । वज्जिज्जा विगहं हासं, अहिज्जंतो सया सुयं ॥ १ ॥ आसणगओ न पुच्छिज्जा, नेव सिज्जागओ कया । आगम्मुक्कडुओ संतो, पुच्छिज्जा पंजलीउडो ॥ २ ॥ इरिअं सुपडिक्कंतो, पसन्नचित्तो अ सुट्ठुपिहिअमुहो । सुत्तं दोसविमुक्कं, सपयच्छेयं गुणे निच्चं ॥ ३ ॥ जिणवरपवयणपायड–णपउणगुरुवयणमुणि–

१ अव्याक्षिप्त आयुक्तश्च ॥ २ ढ० पुस्तके–"पाणिविही" इत्यपि ॥

यसमपुव्वे । एगग्गमणो धणियं, चित्ते चिंतिज्ज सुवियारे ॥ ४ ॥ सुद्धं धम्मुवएसं, गुरुप्पसाएण सम्ममवबुद्धं । सपरोवयारजणगं, जोग्गस्स कहिज्ज धम्मत्थी ॥ ६ ॥" तथा संवेगश्चैकविधः, स च श्रद्धासमृद्धमनसां सदागमाभ्याससत्क्रियाचरणादाबाह्लादरूपः । यदाह—"जह जह सुअमवगाहइ, अइसयरसपसरसंजुअमपुव्वं । तह तह पल्हाइ मुणी, नवनवसंवेगसद्धाए ॥ १ ॥ जह जह संवेगरसो, वन्निज्जइ तह तहेव धन्नाणं । भिज्जंति खिप्पजलानि-भ्भियामकुंभुव्व हिययाइं ॥ २ ॥ सुचिरंपि तवं तविअं, चिन्नं चरणं सुअंपि बहु पढिअं । जइ न हु संवेगरसो, ता तं तुसखंडणं सव्वं ॥ ३ ॥ तह संवेगरसो जइ, खणंपि न समुच्छलिज्ज दिवसंतो । ता विहलेण किमिमिणा, बज्झाणुट्ठाणकट्ठेणं ॥ ४ ॥ पक्खंतो मासंतो, छम्मासंतो व वच्छरंतो वा । जस्स न हु हुज्ज तं जा-ण दूरभव्वं अभव्वं वा ॥५॥" इत्येवंविधषट्त्रिंशद्गुणो गुरुर्जयतु । इति गाथार्थः ॥३॥

अथ तृतीयषट्त्रिंशिकासूत्रगाथामाह—

इंदियविसयपमाया-सवनिद्दकुभावणापणगछक्के । छसु काएसु सजयणो, छत्तीसगुणो गुरू जयउ ॥४॥

व्याख्या—इन्द्रियविषयप्रमादाश्रवनिद्राकुभावनापञ्चकषट्के षट्सु कायेषु च सयत्न इति षट्त्रिंशद्गुणो गुरुर्जयत्विति संक्षेपार्थः । विस्तरार्थस्त्वयम्—तत्र इन्द्रियपञ्चकं श्रवणनयनघ्राणरसनस्पर्शनरूपम् । यदाह—"पंचेव इंदिआइं, लोअपसिद्धाइँ सोयमाईणि । दव्विंदियभाविंदिय-भेअविभिन्नं पुणिक्किक्कं ॥ १ ॥ अंतो बहि निव्वित्ती, तस्सात्तिसरूवगं च उवगरणं । दव्विंदियमियरं पुण, लद्धुवओगेहिं नायव्वं [1] ॥ २ ॥ कायंबपुप्फगोलअ-मसूरअइमुत्तयस्स पुप्फं व । सोअं

[1] लब्ध्युपयोगाभ्याम् ॥

चक्खुं घाणं, खुरप्पपरिसंठियं रसणं ॥ ३ ॥ नाणागारं फासिं–दियं तु वाहल्लओ अ सव्वाइं। अंगुलअसंखभागं, एमेव पिहुत्तओ नवरं ॥ ४ ॥ अंगुलपुहुत्तरसणं, फरिसं तु सरीरवित्थरं भणिअं । वारसहिं जोयणेहिं, सोयं परिगिण्हई सद्दं ॥ ५ ॥ रूवं गिण्हइ चक्खू, जोयणलक्खाओ साइरेगाओ । गंधं रसं च फासं, जोयणनवगाउ सेसाइं ॥ ६ ॥ अंगुलअसंखभागं, मुणंति विसयं जहन्नओ मुत्तुं । चक्खुं तं पुण जाणइ, अंगुलसंखिज्जभागाओ ॥ ७ ॥ इय नायंतस्सरूवो, इंदियतुरए सएसु विसएसु । अणवरयधावमाणे, निगिण्हई नाणरज्जूहिं ॥ ८ ॥" विषयपञ्चकं तु तेषामेवेन्द्रियाणां ग्राह्यं शब्दरूपगन्धरसस्पर्शलक्षणम्। यदार्षम्—"सोयस्स सद्दं गहणं वयंति, तं रागहेउं तु मणुन्नमाहु। तं दोसहेउं अमणुन्नमाहु, समो अ जो तेसु स वीयरागो ॥ १ ॥ सद्दस्स जो गेहिमुवेइ तिव्वं, अकालिअं पावइ से विणासं । रागाउरे हरिणमिउव्व मुद्धे, सद्दे अतित्ते समुवेइमच्चुं ॥ २ ॥ सद्दे विरत्तो मणुओ विसोगो, एएण दुक्खोहपरंपरेण । न लिप्पइ भवमज्झे वसंतो, जलेण वा पुक्खरिणीपलासे ॥ ३ ॥ चक्खुस्स रूवं गहणं वयंति, तं रागहेउं तु मणुन्नमाहु । तं दोसहेउं अमणुन्नमाहु, समो अ जो तेसु स वीयरागो ॥ ४ ॥ रूवस्स जो गेहिमुवेइ तिव्वं, अकालियं पावइ से विणासं । रागाउरे से जह वा पयंगे, आलोगलोले समुवेइ मच्चुं ॥ ५ ॥ रूवे विरत्तो मणुओ विसोगो, एएण दुक्खोहपरंपरेण । न लिप्पइ भवमज्झे वसंतो, जलेण वा पुक्खरिणिपलासे ॥ ६ ॥ घाणस्स गंधं गहणं वयंति, तं रागहेउं तु मणुन्नमाहु । तं दोसहेउं अमणुन्नमाहु, समो य जो तेसु स वीयराओ ॥ ७ ॥ गंधस्स जो गेहिमुवेइ तिव्वं, अकालियं पावइ से विणासं। रागाउरे से जह गंधगिद्धे, सप्पे बिलाओ परिनिक्खमंतो ॥ ८ ॥ गंधे विरत्तो मणुओ विसोगो, एएण दुक्खोहपरंपरेणं। न लिप्पइ भवमज्झे वसंतो, जलेण वा पुक्खरिणी-

१ ज्ञानतरसस्व । २ ख-ग० पुस्तके—" मज्झेऽविसो " इत्यपि ॥

पलासे ॥ ९ ॥ जिब्भाइ रसणं गहणं वयंति, तं रागहेउं तु मणुन्नमाहु । तं दोसहेउं अमणुन्नमाहु, समो य जो तेसु स वीयराओ ॥ १० ॥ रसस्स जो गेहिमुवेइ तिव्वं, अकालियं पावइ से विणासं । रागाउरे बिडिसविभिन्नकाए, मच्छे जहा आमिसभोगगिद्धे ॥ ११ ॥ रसे विरत्तो मणुओ विसोगो, एएण दुक्खोहपरंपरेणं । न लिप्पइ भवमज्झे वसंतो, जलेण वा पुक्खरिणीपलासे ॥ १२ ॥ कायस्स फासं गहणं वयंति, तं रागहेउं तु मणुन्नमाहु । तं दोसहेउं अमणुन्नमाहु, समो य जो तेसु स वीयराओ ॥ १३ फासस्स जो गेहिमुवेइ तिव्वं, अकालियं पावइ से विणासं । रागाउरे सीअजलावसन्ने, गाहग्गहीए महिसेवऽरण्णे ॥ १४ ॥ फासे विरत्तो मणुओ विसोगो, एएण दुक्खोहपरंपरेणं । न लिप्पइ भवमज्झे वसंतो, जलेण वा पुक्खरिणीपलासे ॥ १५ ॥" इति ॥ अथ प्रमादपञ्चकं मद्य १ विषय २ कषाय ३ निद्रा ४ विकथा ५ लक्षणम् । यदभिधीयते—" मज्जं १ विसय २ कसाया ३, निद्दा ४ विगहा ५ य पंचमी भणिया । एए पंच पमाया, जीवं पाडंति संसारे ॥ १ ॥" अपि च—" मज्जाइया पंच पमायभेया, पावस्स हेऊ पभणंति छेया । मज्जं तहिं सव्वअणत्थखाणी, मोहिज्जए तेण जमेस पाणी ॥ १ ॥ जे कामभोगेसु अतित्तचित्ता, अन्नन्ननारीसु दढं पसत्ता । ते बंधणाईसु विडंबणाओ, लहंति पज्जोयनरेसरु व्व ॥ २ ॥ पढंति नाणं चरणं धरंति, धम्मोवएसे भवियाण दिंति । तवंति तिव्वं च तवं अणेगे, कसायसत्तू विरला जयंति ॥ ३ ॥ निद्दापमाएण गलेइ नाणं, हवेइ बुद्धीवि य अप्पमाणं । सीयंति सव्वेवि हु धम्मजोगा, वज्जेह णं तं खलु भव्वलोगा ! ॥ ४ ॥ इत्थीकहाई विगहा चउद्धा, धम्मीण एसा भणियं निसिद्धा । रागाइदोसाण जओ निमित्तं, विहीयमाणं मइलेइ चित्तं ॥ ५" ॥ इति ॥ तथा आश्रवपञ्चकं हिंसा १ ऽलीका २ ऽदत्ता ३ ऽब्रह्म ४ परिग्रहप्रवृत्ति

१–" ०गाही " इत्यपि ॥ २ अ० पुस्तके–"अपि च" इति नास्ति ॥ ३ अ० पुस्तके–"पुरुष्व(?)ति" इत्यपि ॥

[illegible] ॥ ३ ॥ [illegible] । अंगलअसंखभागं, एमेव पिङ्-
५ रूपम् । यदाह—" हिंसा १ ऽलीअ २ मदत्तं ३ च, मेहुणं ४ च परिग्गहो ५ । पावस्स आसवा एए, आगमंमि वियाहिया ॥ १ ॥ " तद्यतना च निवृत्तिरूपा, सा च व्रतपञ्चकावसरे प्ररूपितैव । अथ निद्रापञ्चकम् । यथा—निद्रा १ निद्रानिद्रा २ प्रचला ३ प्रचलाप्रचला ४ स्त्यानर्धिलक्षणम् । यदाह—" निद्दा १ य निद्दनिद्दा २, पयला ३ तह चेव पयलपयला ४ उ । थीणद्धी ५ अ कमेणं, निद्दापणगं वियाणाहि ॥ १ ॥ सुहपडिबोहा निद्दा, निद्दानिद्दा य दुक्खपडिबोहा । पयला ठिओवविट्ठ—स्स पयलपयला उ चंकमओ ॥२॥ दिणचिंतिअत्थकरणी, थीणद्धी अद्धचक्किअद्धबला । करिदंतरुक्खसाहा—मिउपिंडसिलाइनाएहिं[1] ॥३॥" कुभावनापञ्चकम् । यथा—कान्दर्पिक १ किल्बिषिका २ऽऽभियोगिका ३ऽऽसुर ४ संमोह ५ भावनालक्षणम् । यदाह—" कंदप्पदेवकिब्बिसि—अ आभिओगाऽऽसुरा य संमोहा ५। एसा उ संकिलिट्ठा, पंचविहा भावणा भणिया ॥ १ ॥ कंदप्पे कुक्कुइए, दुहसीले आविहासणकरे[2] अ । विम्हावंतो अ परं, कंदप्पं भावणं कुणइ ॥ २ ॥ नाणस्स केवलीणं, धम्मायरियाण सव्वसाहूणं । भासं अवन्नवायं, किब्बिसिअं भावणं कुणइ ॥ ३ ॥ कोऊयभूइकम्मे, पसिणापसिणे निमित्तमाएसी । इड्ढिरससायगरुओ, अभिओगं भावणं कुणइ ॥ ४ ॥ अणुबद्धविग्गहु च्चिअ, संसत्ततवो निमित्तमाजीवी । निक्किवनिराणुकंपो, आसुरिअं भावणं कुणइ ॥ ५ ॥ उम्मग्गदेसओ म—ग्गनासओ मग्गविपडिवत्ती य । मोहेण य मोहित्ता, संमोहं भावणं कुणइ ॥ ६ ॥ जो संजओवि एया—सु अप्पसत्थासु वट्टई पायं । सो तव्विहेसु गच्छइ, सुरेसु भइओ चरणहीणो ॥ ७ ॥" इन्द्रियादिपञ्चकषट्के सयत्नो वर्जनविधौ यत्नपरः । तथा षट्सु कायेषु च पृथ्वीकायादिषु सयत्नो रक्षापरायणः । यदार्षम्—" पुढविदगअगणिवाऊ, तणरुक्खसबीयगा । तसा य पाणा जीवुत्ति, इय वुत्तं महेसिणा ॥ १॥

१ ज्ञातैः । २ म० उ० पुस्तके—'हासकरणे अ" इत्यपि ॥

तेसिं अत्थणजोएणं, निच्चं होयव्वयं सिया। मणसा कायवक्केणं, एवं हवइ संजए ॥ २ ॥" इत्येवं षट्त्रिंशद्गुणो गुरुर्जयतु। इति गाथार्थः ॥ ४ ॥

अथ चतुर्थषट्त्रिंशिकासूत्रगाथामाह—

छव्वयणदोसलेसा-वस्सयसद्दव्वतक्कभासाण। परमत्थजाणणेणं, छत्तीसगुणो गुरू जयउ ॥५॥

व्याख्या—प्रत्येकं षट्प्रकाराणां वचनदोषलेश्याऽऽवश्यकसद्द्रव्यतर्कभाषाणां परमार्थपरिज्ञानेन षट्त्रिंशद्गुणो गुरुर्जयत्विति संक्षेपार्थः। व्यासार्थस्त्वयम्-षड् वचनदोषाः, अलीक १ हीलित २ खिंसित ३ कर्कश ४ नात्रकोद्धट्टना ५ ऽधिकरणोदीरक ६ लक्षणाः। यदागमः—"अलियवयणे १ हीलियवयणे २ खिंसियवयणे ३ कक्कसवयणे ४ अगारत्थियवयणे ५ उवसमियाहिगरणुईरणवयणे ६त्ति।" तत्रालीकम्—"मुसावाओ य लोगंमि, सव्वसाहूहिं गरहिओ। अविस्सासो य भूयाणं, तम्हा मोसं विवज्जए ॥ १ ॥" हीलितम्—"सासूयगणियवायग-जिट्ठज्जायरियपमुहसद्देहिं। जमिहामंतणमेयं, हीलियवयणं न भासिज्जा ॥ २ ॥" खिंसितम्—"तहेव होले गोलेत्ति, साणे वा विसुलत्ति य। दुम्मए दुहए वावि, नेवं भासिज्ज पन्नवं ॥ ३ ॥" कर्कशम्—"तहेव काणं काणत्ति, पंडगं पंडगत्ति वा। वाहिओ वा विरोगित्ति, तेणं चोरित्ति नो वए ॥ ४ ॥" नात्रकोद्धट्टनम्—"अज्जए पज्जए वावि, अम्मो माउसिउत्ति य। पिउस्सिए भायणिज्जत्ति, धूए नत्तूणियत्ति य ॥ ५ ॥" अधिकरणोदीरकम्—"खामियउवसामियाइं, अहिगरणाइं पुणो उदीरेइ। जो कोइ तस्स वयणं,

---

१ ज्ञानादिव्यापारेण रक्षणाय गवेषणाव्यापारेण वा २ ड० पुस्तके-"नात्रकोद्घाटन०" व० पुस्तके-"द्घाट्टिक०" अ० पुस्तके-"द्घट्टन०" इत्यपि पाठः ॥ ३ तथैव होल! इति गोल! इति नीचामन्त्रणे श्वेति वा वृषल! इति वा द्रमक! इति वा दुर्भग! इति वापि प्रज्ञावान्नैवं भाषेत। ४ आर्यक'-पितामहादिः ॥

चक्खं घाणं, खरप्पपरिसंठियं रसणं ॥ ३ ॥ नाणागारं फासिं–दियं तु बाहल्लओ अ सव्वाइं । अंगुलअसंखभागं, एमेव पिहु-

अहिगरणोदीरणं भणिअं ॥ ६ ॥" तथा षड् लेश्याः, कृष्ण १ नील २ कापोत ३ तेजः ४ पद्म ५ शुक्ल ६ लेश्यालक्षणाः । यदागमः—"किण्हा १ नीला २ काऊ ३, तेऊ ४ पम्हा ५ य सुक्क ६ लेसाय । एयाउ सनामसमा–णचित्तपरिणामरूवाओ ॥ १ ॥" अपरं च—"कृष्णादिद्रव्यसाचिव्यात्, परिणामो य आत्मनः । स्फाटिकस्येवं तत्रायं, लेश्याशब्दः प्रयुज्यते ॥ १ ॥ रुद्रो दुष्टः सदा क्रोधी, कलही धर्मवर्जितः । निर्दयो वैरसंयुक्तः, कृष्णलेश्य उदाहृतः ॥ २ ॥ अलसो मन्दबुद्धिश्च, स्त्रीलुब्धश्च प्रपञ्चवान् । दीर्घरोषी सदामानी, नीललेश्यः प्रकीर्तितः ॥ ३ ॥ चिन्तातुरो विषादी च, परनिन्दाऽऽत्मशंसकृत् । संग्राममरणाशंसी, प्रोक्तः कापोतलेश्यकः ॥ ४ ॥ विद्यावान् करुणासिन्धुः, कार्याकार्यविचारकः । लाभालाभे सदा प्रीत–स्तेजोलेश्य उदाहृतः ॥५॥ शक्तः क्षमी सदात्यागी, देवतार्चन उद्यमी । शुचिः शीलसंदानन्दः, पद्मलेश्यः प्ररूपितः ॥ ६ ॥ परात्मकार्यकृत् स्वस्थो, वाञ्छाशोकविवर्जितः । रागद्वेषभयत्यक्तः, शुक्ललेश्यः प्रदर्शितः ॥ ७ ॥" एतासां च क्रमेण परिणामविशेषान्तरदर्शकः सहकारादितरुफलस्पृहयालुषट्पथिकपुरुषाणां ग्रामभङ्गोद्यतधाटीपुरुषाणां च दृष्टान्तः सुप्रतीत एव । तत्संग्रहश्चायम्—"मूलं १ साह २ पसाहा ३, गुच्छ ४ फले ५ भूमिपडिय ६ भक्खणया । सव्वं १ माणुस २ पुरिसा ३, साउह ४ जुज्झंत ५ धणहरणा ६ ॥ १ ॥" तथाऽऽवश्यकषट्कम्, सामायिक १ चतुर्विंशतिस्तव २ वन्दनक ३ प्रतिक्रमण ४ कायोत्सर्ग ५ प्रत्याख्यान ६ लक्षणम् । यदार्षम्—"नमो तेसिं खमासमणाणं, जेहिं इमं वाइयं छव्विहमावस्सयं भगवंतं तंजहा–सामाइयं चउवीसत्थओ वंदणयं पडिकमणं काउसग्गो पच्चक्खाणंति ।" तत्र सामायिकम्—"जस्स सामाणिओ अप्पा, संजमे नियमे तवे । तस्स सामाइयं होइ, इइ केवलिभासिअं ॥ १ ॥ जो समो सव्वभूएसु,

१ ड० पुस्तके–"शीलः सदानन्दी" इत्यपि । २ सायुध. ॥

तसेसु थावरेसु य। तस्स सामाइयं होइ, इइ केवलिभासिअं ॥ २ ॥" तथा चतुर्विंशतिस्तवः—" इह अवसप्पिणिकाले, इह भरहे उसहनाहपामुक्खा। चउवीसं तित्थयरा, परमपयपइं पयासिंसु ॥ १ ॥ तत्तो सयावि तेसिं, चउवीसण्हंपि परमपुरिसाणं। जो संथवो विहिज्जइ, तं चउवीसत्थयं विंति ॥ २॥ भावत्थयदव्वत्थय–भेएणं सो दुहा सुयक्खाओ। भावत्थओ जईणं, जहजुग्गं दुन्निवि गिहीणं ॥ ३ ॥" अथ वन्दनकम्—" वंदणयंपि हु तिविहं, तं फिट्टा छोभ वारसावत्तं। सिरनमणाइसु पढमं, पुण्णखमासमणदुगि वीयं ॥ १ ॥ तइयं तु छंदणदुगे, तत्थ मिहो आइमं सयलसंघे। वीयं तु दंसणीण य, पयट्ठियाणं च तइयं तु ॥ २ ॥ आयरियउवज्झाए, पवित्ति थेरे तहेव रायणिए। एएसिं किइकम्मं, कायव्वं निज्जरट्ठाए ॥ ३ ॥" अथ प्रतिक्रमणम्—" स्वस्थानाद्यत्परं स्थानं, प्रमादस्य वशाद्गतः। तत्रैव क्रमणं भूयः, प्रतिक्रमणमुच्यते ॥ १ ॥ सपडिक्कमणो धम्मो, पुरिमस्स य पच्छिमस्स य जिणस्स। मज्झिमगाण जिणाणं, कारणजाए पडिक्कमणं ॥ २॥ मिच्छत्तपडिक्कमणं, तहेव अस्संजमे पडिक्कमणं। कसायाण पडिक्कमणं, जोगाणं अप्पसत्थाणं ॥ ३ ॥ पडिसिद्धाणं करणे, किच्चाणमकरणे य पडिक्कमणं। असद्दहणे य तहा, विवरीयपरूवणाए य ॥ ४ ॥ देवसियं राईयं, पक्खिय चाउम्मासियं च वच्छरियं। पंचविहं पडिक्कमणं, सविसेसं तत्थ जइयव्वं ॥ ५ ॥ जह गेहं पइदिवसं, विसोहियं तहवि पक्खसंधीसु। सोहिज्जइ सविसेसं, एयं इहयंपि नायव्वं ॥ ६ ॥" अथ कायोत्सर्गः—" उस्सग्गोऽविय दुविहो, चिट्ठाए अभिभवे य नायव्वो। पडिक्कमणाइसु पढमो, कम्मखयट्ठा भवे वीओ ॥ १ ॥ संवच्छरमुक्कोसो, अंतमुहुत्तं च अभिभवुस्सग्गो। चिट्ठा उस्सग्गस्स उ, कालपमाणं पुणो एवं ॥ २ ॥ दो चत्तारि दुवालस, वीसं चत्ता समंगलुज्जोया। राइय देसिय पक्खिय चाउ-

१ ड० पुस्तके—"पयासंतु" इत्यपि ॥ २ ड० पुस्तके—"समक्खाओ" इत्यपि ॥ ३ ड० पुस्तके—"पइदिअह" इत्यपि ॥ ४ ब–ड० पुस्तके—"एवं" इत्यपि ॥

म्मासे य वरिसे य ॥ ३ ॥ काउस्सग्गे जह सुट्ठियस्स, भज्जंति अंगुवंगाइं। तह भिंदंति सुविहिया, अट्ठविहं कम्मसंघायं ॥ ४॥" अथ प्रत्याख्यानम्—" पच्चक्खाणं दुविहं, मूलगुणे चेव उत्तरगुणे य। मूले पंचविहं खलु, साहूणं होइ नायव्वं ॥ १ ॥ सड्ढाणं तु दुवालस–भेअं मूलंमि पच्चखाणं तु। उत्तरगुणदुण्हंपि हु, तं नमुक्कारसहियाई॥ २॥" इति ॥ तथा सद्द्रव्यषट्कम्, धर्माधर्माकाशकालजीवपुद्गललक्षणम्। यदाह—" धम्मो तहा अहम्मो, नहो य कालो तहेव जीवो य। तह पुग्गला य एयं, भणियं सद्दव्वछक्कंति ॥ १ ॥ गइलक्खणो य धम्मो, अहम्मो ठाणलक्खणो। भायणं सव्वदव्वाणं, नहं ओगाहलक्खणं ॥ २ ॥ वत्तणालक्खणो कालो, जीवो उवओगलक्खणो। नाणेणं दंसणेणं च, सुहेण य दुहेण य ॥ ३ ॥ सद्दंधयारउज्जोयपहाछायातवेइया। वण्णगंधरसा फासा, पुग्गलाणं तु लक्खणं ॥४॥" इति ॥ तथा तर्कषट्कम्, षड्दर्शनप्रवादलक्षणम्। तानि दर्शनानि चामूनि—जैनं १ मीमांसकं २ बौद्धं ३ नैयायिकं ४ वैशेषिकं ५ सांख्यं ६ चेति। यदाह—" दर्शनानि षडेवाहु–जैनं १ मीमांसकं २ तथा। बौद्धं ३ नैयायिकं ४ वैशे–षिकं ५ सांख्य ६ मिति क्रमात् ॥ १॥ केचिन्न्यायविशेषाभ्यां, तर्काभ्यां शैवमेककम्। मन्यन्ते तन्मते ज्ञेयं, षष्ठं नास्तिकदर्शनम् ॥ २ ॥" तेषां षण्णामपि[2] तर्काः स्वस्वमतप्ररूपणरूपाः। तथाहि—जैनदर्शनेऽर्हन् देवता। जीवाजीवपुण्यपापाश्रवसंवरबन्धमोक्षानिर्जराख्यानि नव तत्त्वानि। प्रत्यक्षं परोक्षं चेति प्रमाणे द्वे। नित्यानित्याद्यनेकान्तवादः। सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः, सकलकर्मक्षये लोकाग्रप्रदेशे नित्यज्ञानानन्दमयश्च मोक्षः। इत्यादि जैनमतम् १। मीमांसक दर्शने सर्वज्ञो देवता नास्ति। किन्तु नित्यवेदवाक्येभ्य एव तत्त्वानिर्णयः। प्रत्यक्षमनुमानमुपमानमागमोऽर्थापत्तिरभावश्चेति षट् प्रमाणानि। नित्याद्येकान्तवादः। वेदविहितानुष्ठानं मोक्षमार्गः। नित्य-

१ ब-उ-पुस्तके-"तह। छायाऽत्तवोवि य" इत्यपि। २ ब पुस्तके "दर्शनानां" इत्यधिकम् ॥

निरतिशयसुखाविर्भावश्च मोक्षः । इत्यादि मीमांसकमतम् २ । बुद्धदर्शने बुद्धो देवता । दुःखायतनसमुदयमार्गरूपाणि आर्यसत्यसंज्ञानि चत्वारि तत्त्वानि । प्रत्यक्षमनुमानं च द्वे प्रमाणे । क्षणिकैकान्तवादः । सर्वक्षणिकत्वसर्वनैरात्म्यवासनाक्लेशसमुदयच्छेदनं प्रदीपस्येव ज्ञानसन्तानोच्छेदश्च मोक्षः । इत्यादि बौद्धमतम् ३ । नैयायिकदर्शने ईश्वरो देवता । प्रमाण १ प्रमेय २ संशय ३ प्रयोजन ४ दृष्टान्त ५ सिद्धान्ता ६ ऽवयव ७ तर्क ८ निर्णय ९ वाद १० जल्प ११ वितण्डा १२ हेत्वाभास १३ च्छल १४ जाति १५ निग्रह १६ स्थानानि षोडश तत्त्वानि । प्रत्यक्षमनुमानमुपमानमागमश्चेति चत्वारि प्रमाणानि । नित्यानित्यैकान्तवादः । आत्मादिप्रमेयतत्त्वज्ञानं मोक्षमार्गः । षडिन्द्रियाणि ६, षड् विषयाः १२, षड् बुद्धयः १८, सुखं १९, दुःखं २०, शरीरं २१ चेत्येकविंशतिप्रभेदभिन्नस्य दुःखस्यात्यन्तं छेदे च मोक्षः । इत्यादि नैयायिकमतम् ४ । वैशेषिकदर्शनेऽपीश्वरो देवता । द्रव्यगुणकर्मसामान्यविशेषसमवायाख्याः षट् पदार्थास्तत्त्वतयाऽभिप्रेताः । प्रत्यक्षमनुमानं चेति प्रमाणद्वयं । नित्यानित्यैकान्तवादः । आत्मनः श्रवणमनननिदिध्यासनसाक्षात्कारो मोक्षमार्गः । बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काररूपाणां नवानां विशेषगुणानामत्यन्तोच्छेदे च मोक्षः । इत्यादि वैशेषिकमतम् ५ । सांख्यदर्शने ईश्वरः कपिलो वा देवः । आत्मा, प्रकृतिः, महानहङ्कारः, गन्धरूपरसस्पर्शशब्दाख्यानि पञ्च तन्मात्राणि, पृथिव्यप्तेजोवाय्वाकाशाख्यानि पञ्च भूतानि, घ्राणरसनचक्षुस्त्वक्श्रोत्रमनांसीति षड् बुद्धीन्द्रियाणि, पायूपस्थवचःपाणिपादाख्यानि पञ्च कर्मेन्द्रियाणि इत्येवं पञ्चविंशति तत्त्वानि । प्रत्यक्षमनुमानमागमश्चेति प्रमाणत्रयम् । नित्यैकान्तवादः । पञ्चविंशतितत्त्वज्ञानं मोक्षमार्गः । प्रकृतिपुरुषविवेकदर्शनान्निवृत्तायां प्रकृतौ पुरुषस्य स्वरूपेणावस्थानं मोक्षः । इत्यादि सांख्यमतम् ६ ॥ नास्तिकाः कापालिकाः, तेषां दर्शनाभासे सर्वज्ञो नास्ति, अधर्मो नास्ति, धर्मोऽपि नास्ति, जीवो नास्ति, परलोको नास्ति । इत्यादि तन्मतम् । प्रत्यक्षं चैकं

प्रमाणम् । मोक्षोऽपि नास्त्येव । इति नास्तिकमतम् । इत्येवंभूतषड्दर्शनतर्का इति ॥ ७ ॥ तथा भाषाषट्कम्, संस्कृत १ प्राकृत २ शौरसेन ३ मागध ४ पैशाचिक ५ अपभ्रंश ६ लक्षणम् । तत्र संस्कृतं । यथा—
" सत्संगत्या जिनपद–नत्या गुरुसेवया सदा दयया । तपसा दानेन तथा, स्यात्सफलं मानुषं जन्म ॥ १ ॥ प्राकृतं यथा—" लच्छी गिहीण लज्जा, जुवईणं नरवईण सोंडीरं । दिट्ठी मुहाण कव्वं, बुहाण खलु मंडणं परमं ॥ २ ॥ "
शौरसेनी यथा—" तीयध समग्ग पुव्विं, तायह सग्गंपि भोदु तुह भद्दं । होदु जयंसुत्तंसो, तुह कित्तीए अपुरवाए ॥ ३ ॥"
मागधी यथा—" शपलविवस्कालहिदे, पिस्कंदे सव्वमोल्लदिट्ठीए । मिदपिअमाचस्कंदे, चिट्ठादि मग्गंमि मोकस्स ॥ ४ ॥ "
पैशाचिकी यथा—" यति अरिहपरममंतो, पठिय्यते कीर ते न जीववधो । याति सनाति सजाति, ततो जनो निव्वुतिं जाति ॥ ५ ॥ " अपभ्रंशभाषा यथा—" ते धन्ना कन्नुल्लडा, हियडुल्लातिकयत्थ । जे खणि खणि बुल्लडइं, घुंटहिं धरइ सुअत्थ ॥ ६ ॥" इत्येतत्षट्त्रिंशद्गुणो गुरुर्जयतु । इति गाथार्थः ॥ ५ ॥

अथ पञ्चमीषट्त्रिंशिकासूत्रगाथामाह—

सगँभयरहिओ सगपिं–डँपाँणएसणसुँहेहिं संजुत्तो । अट्ठमयट्ठाणरहिओ, छत्तीसगुणो गुरू जयउ ॥६॥

व्याख्या—सप्तभयरहितः, सप्तपिण्डैषणासप्तपानीयैषणासप्तसुखसंयुक्तः अष्टमदस्थानरहितश्चेति षट्त्रिंशद्गुणो गुरुर्जयत्विति समासार्थः । विस्तरार्थस्त्वयम्—भयसप्तकं इहलोक १ परलोका २ ऽऽदाना ३ ऽऽकस्मिका ४ ऽऽजीविका ५ मरणा

१ [illegible]

६ऽश्लोक ७ भयलक्षणम्। यदाह—"इहपरलोगा २ दाण ३ म-कम्हा ४ आजीव ५ मरण ६ मसिलोइ ७ त्ति "। देवेभ्यो देवस्य नरेभ्यो नरस्य तिर्यग्भ्यस्तिरश्चः नारकेभ्यो नारकस्य यद्भयं तदिहलोकभयम् १। नरतिर्यग्भ्यां देवस्य, देवातिर्यग्भ्यां नरस्य, देवनराभ्यां तिरश्चः, देवान्नारकस्य च यद्भयं तत्परलोकभयम् २। मा अयं इदं मदीयं वस्तु वलादादास्यतीत्यादानभयम् ३। निर्हेतुकं केवलस्वमनोभ्रान्तिजनितं यद्भयं तदाकस्मिकभयम् ४। आजीविका—जीवनवृत्तिः, तदुपायचिन्ताजनितमाजीविकाभयम् ५। मरणभयं प्रतीतम् ६। अश्लोकोऽपयशः, तद्भयमश्लोकभयम् ७। इत्येवंविधभयसप्तकरहितः। तथा पिण्डैषणासप्तकं संसृष्टा १ असंसृष्टा २ उद्धृता ३ अल्पलेपा ४ अवगृहीता ५ प्रगृहीता ६ उज्झितधर्मिका ७ लक्षणम्। यदाह—" संसट्ठ १ मसंसट्ठा २, उद्धिय ३ तह अप्पलेविया ४ चेव। उग्गहिया ५ पग्गहिया ६ उज्झियधम्मा ७ य सत्तमिया ॥ १ ॥" तत्र संसृष्टा दध्यादिका १। असंसृष्टा मोदकादिका २। कस्यापि कृते परिवेषणायोत्पाटिता उद्धृता ३। वल्लचणकादिका अल्पलेपा ४। पिठराद्भाजनान्तरे क्षिप्ता अवगृहीता ५। भोक्तुं परिवेषिता प्रगृहीता ६। त्यागार्हा उज्झितधर्मा ७। इत्येताभिः पिण्डैषणाभिः संयुक्तः। पानैषणाऽप्येवंविधा एव। नवरं संसृष्टा तन्दुलोदकादिका, असंसृष्टा विकटोदकादिका, अल्पलेपा सौवीरादिका, इत्येताभिरपि युक्तः। सुखसप्तकं यथा—संतोष १ करणजय २ प्रसन्नचित्तता ३ दयालुता ४ सत्य ५ शौच ६ दुर्जनपरिहार ७ लक्षणम्। यदाह—" संतोसो १ करणजओ २, पसन्नचित्तं ३ दयालुभावो ४ य। सच्चं ५ सोयं ६ दुज्जण-परिहारो ७ इय सुहा सत्त ॥ १ ॥ तं नत्थि सुहं चक्की-ण नेव इंदाण नमिरअमराणं। जं निज्जियमयणाणं, मुणीण संतोसनिरयाणं ॥ २ ॥ तरलतरतुरअतुल्ला-णि जेहि करणाणि पंचवि जिणित्ता। सवसीकयाइं ते च्चिय, जयंमि सुहिणो पुरिससीहा ॥ ३ ॥ सरयससिसरिससुअना-णवारिधाराहिं धोवियं जेहिं। सुपसन्नं

नियममणं, विहियं ते सुक्खमणुपत्ता ॥ ४ ॥ सव्वेसिं जीवाणं, दयावरा जे हवंति नरवसहा । करकमलतले तेसिं, भम-रिव्व सिरी समल्लियइ ॥ ५ ॥ परदुक्खुप्पायगवय-णभणणविरयाण पुरिसरयणाणं । इहलोए परलोए, कल्लाणपरंपरा प-रमा ॥ ६ ॥ सीलकवयं न भिन्नं, जेसिं तिक्खेहिं कामबाणेहिं । कप्पूरतारकित्तीइ, तेहिं भरियं धरावलयं ॥ ७ ॥ दुस्सी-ललोयसंस-ग्गचायवद्धायराण जीवाणं । गुणवल्लीउल्लासं, लहेइ सुविवेयफलजालं ॥ ८ ॥ एयाइँ ताइँ सत्त य, सुहाइँ जाइं जए पसिद्धाइं । एएहिं जो य सुहिओ, सुच्चिय परमत्थओ सुहिओ ॥ ९ ॥ " इत्येवंविधैः सप्तभिरपि सुखैः संयुक्तः । तथा अष्ट मदस्थानानि जाति १ कुल २ रूप ३ बल ४ श्रुत ५ तपो ६ लाभ ७ श्री ८ मदरूपाणि । यदाह—" जाइ १ कुल २ रूव ३ बल ४ सुअ ५—तव ६ लाभ ७ सिरीहिं ८ अट्ठमयमत्तो । एयाइं चिय बंधइ, असुहाइँ बहुं च संसारे ॥१॥" अपि च—" जातिभेदाननैकविधा-नुत्तमाधममध्यमान् । दृष्ट्वा को नाम कुर्वीत, जातु जातिमदं सुधीः ? ॥ १ ॥ अकुलीना-नपि प्रेक्ष्य, प्रज्ञाश्रीशीलशालिनः । न कर्तव्यः कुलमदो, महाकुलभवैरपि ॥ २ ॥ सप्तधातुमये देहे, चयापचयधर्मिणि । ज-रारुजाभिभाव्यस्य, को रूपस्य मदं वहेत् ॥ ३ ॥ बलवन्तोऽपि जरसि, मृत्यौ कर्मफलान्तरे । अबलाश्चेत्ततो हन्त !, तेषां बलमदो मुधा ॥ ४ ॥ श्रीमद्गणधरेन्द्राणां, श्रुत्वा निर्माणधारणे । कः श्रयेत श्रुतमदं, सकर्णहृदयो जनः ॥ ५ ॥ नाभेयस्य तपोनिष्ठां, श्रुत्वा वीरजिनस्य च । को नाम स्वल्पतपसि, स्वकीये मदमाश्रयेत् ॥ ६ ॥ अन्तरायक्षयादेव, लाभो भवति नान्यथा । ततस्तु वस्तुतत्त्वज्ञो, न लाभमदमुद्वहेत् ॥ ७ ॥ गुणोज्ज्वलादपि भ्रश्ये-द्दोषवन्तमपि श्रयेत् । कुशीलस्त्रीव या श्रीः सा, न मदाय विवेकिनाम् ॥ ८ ॥ " इत्येतैर्मदस्थानैरपि रहितो गुरुः । इति गाथार्थः ॥ ६ ॥

अथ सूत्रतः षष्टीषट्त्रिंशिकामाह—

अट्ठविहनाणदंसण–चारित्तायारवाइगुणकलिओ।
चउविहबुद्धिसमिद्धो, छत्तीसगुणो गुरू जयउ ॥ ७ ॥

व्याख्या—प्रत्येकमष्टविधज्ञानाचारदर्शनाचारचारित्राचारवादिगुणकलितः, चतुर्विधबुद्धिसमृद्धश्चेति षट्त्रिंशद्गुणो गुरुर्जयत्विति संक्षेपार्थः। विस्तरार्थस्त्वयम्—अष्टविधो ज्ञानाचारः कालविनयादिकः। यदाहुः—"काले विणए बहु-मा–णे उवहाणे तहा अ निण्हवणे। वंजण अत्थ तदुभए, अट्ठविहो नाणमायारो ॥ १ ॥ जं जम्मि होइ काले, आयारि-यव्वं स कालआयारो। सेसो होइ अकालो, तत्थ य धमएण दिट्ठंतो ॥ २ ॥ नीयासणमंजलिप–ग्गहाइ विणओ इहं च सेणियओ। बहुमाणो मणपीई, तत्थ पुलिंदेण आहरणं ॥ ३ ॥ दुग्गइपडणुवधरणा, उवहाणं जत्थ जत्थ जं सुत्ते। आगा-ढमणागाढे, मासतुसाई इहाहरणं ॥ ४ ॥ निण्हवणं अवलावो, तत्थ य दगसूयरेण दिट्ठंतो। वंजण अत्थ तदुभए, दामन्न-गमाइणो णेयो ॥ ५ ॥" अष्टविधो दर्शनाचारो निःशङ्कितादिकः। यदाह—"निस्संकिय १ निक्कंखिय २ निव्वितिगि-च्छा ३ अमूढदिट्ठी ४ य। उववूह ५ थिरीकरणे ६, वच्छल्ल ७ पभावणे ८ अट्ठ ॥ १ ॥ संसयकरणं संका, बालदुगेणित्थ होइ दिट्ठंतो। अन्नन्नदंसणाणं, कंक्खाए सेवगो नायं ॥ २ ॥ साहुदुगंछालक्खण–विचिगिच्छाए दुगंधिया नायं। परवाइं-डंबरेहिं, अमूढदिट्ठी उ सुलसाई ॥ ३ ॥ तवसुयपमुहगुणाणं, कण्हो उववूहणं सया कुणइ। धम्मंमि कओ सुथिरो, आ-साढो खुड्डगसुरेणं ॥ ४ ॥ निच्चंपि सधम्माणं, वच्छल्लं कुणह वयरसामिव्व। सासणपभावगा पुण, अजरक्खियमाइणो

१ य–पुस्तके–"तहय निण्हवणे" इत्यपि। २ ब–पुस्तके–"णाया" इत्यपि ॥

षद्-
॥

अट्ठ ॥ ५ ॥ " अष्टविधश्चारित्राचारः समितिगुप्तिलक्षणः । यदाह—" पणिहाणजोगजुत्तो, पंचहिँ समिईहिँ [1]तीहिं गुत्तीहिं। एस चरित्तायारो, अट्ठविहो होइ नायव्वो ॥१॥ " तथा अष्टविधाचारवदादि[2]गुणा अपि गुरोरेव। ते चामी—आचारवान् १ अवधारणावान् २ व्यवहारवान् ३ अपव्रीडकः ४ कारकः ५ अपरिश्रावी ६ निर्यापकः ७ अपायदर्शी ८ चेति । यदुच्यते—" आयारव १ मवहारव २, ववहारो ३ वीलए ४ पकुव्वी ५ अ । अपरिस्सावी ६ निज्जव ७, अवायदंसी ८ गुरू भणिओ ॥ १ ॥ आयारवमायारं, पंचविहं मुणइ जो उ आयरइ । अवहारवमवहारे, आलोयंतस्स तं सव्वं ॥ २ ॥ ववहारव ववहारं, आगममाई उ मुणइ पंचविहं । [3]उववीलव गूहंतं, जह आलोएइ तं सव्वं ॥ ३ ॥ आलोइयम्मि सोहिं, जो कारावेइ सो पकुव्वी उ । जो अन्नस्सवि दोसे, न [4]कहेई अ सो अपरिसावी ॥ ४ ॥ [5]निज्जवओ तह कुणइ, निव्वहई जेण तं तु पच्छित्तं । इहपरलोयावाए, [6]दंसेई अवायदंसी उ ॥ ५ ॥ " चतुर्विधा बुद्धिः, औत्पत्तिक्यादिका । यदाह—" उप्पइया १ वेणइया २, कम्मिय ३ तह पारिणामिया ४ चेव । बुद्धी चउव्विहा खलु, निदिट्ठा समयवेऊहिं ॥ १ ॥ पुव्वमदिट्ठमसुइय—वेइयतक्खणविसुद्धगाहियट्ठा । अव्वाहयफलजोगा, बुद्धी उप्पत्तिया नाम ॥ २ ॥ भरनित्थरणसमत्था, तिवग्गसुत्तत्थगाहियपेयाला । (पर्यन्तेत्यर्थः) [7]उभओलोगफलवई, विणयसमुत्था हवइ बुद्धी ॥ ३ ॥ उवओगदिट्ठसारा, कम्मपसंगपरिघोलणविसाला । साहुक्कारफलवई, कम्मसमुत्था हवइ बुद्धी ॥ ४ ॥ " कर्मप्रसङ्गोऽभ्यासः, परिघोलनं विचारः, ताभ्यां विस्तीर्णेत्यर्थः । " अणुमाणहेउदिट्ठंतसाहिया [8]वयविवक्कपरिणामा । हियनिस्सेसफलवई, बुद्धी परिणामिया नाम ॥ ६ ॥ उप्प-

---

१ उ-पुस्तके-" तिहि उ " इत्यपि । २ " वादिगुणाः " इति प्रकृतम् । ३ ब-पुस्तके-" अववीलव " इत्यपि । ४ ब-पुस्तके-" कहेई सो " इत्यपि ॥ ५ ब-पुस्तके-" निज्जावउ " इत्यपि । ६ ब-पुस्तके-" देसेइ " इत्यपि । ७ ब-पुस्तके-" उभग " इत्यपि । ८ ब-क-पुस्तके-" वयविवक्क " इत्यपि ॥

त्तिय भरहाई, वेणइयाए निमित्तमाईया । कम्मिय हिरण्णियाई, परिणामियबुद्धि अभयाई ॥ ७ ॥" इत्येवं षट्त्रिंशद्गुणो गुरुर्जयतु । इति गाथार्थः ॥ ७ ॥

अथ सप्तमषट्त्रिंशिकासूत्रगाथामाह—

अट्ठविहकम्मअट्ठं—गजोगमहसिद्धिजोगदिट्ठिविऊ ।
चउविहऽणुओगनिउणो, छत्तीसगुणो गुरू जयउ ॥ ८ ॥

व्याख्या—अष्टविधकर्मणां, अष्टाङ्गयोगस्य, अष्टाङ्गमहासिद्धेः, अष्टाङ्गयोगदृष्टेश्च स्वरूपं वेत्ति इत्यष्टविधकर्माष्टाङ्गयोगमहासिद्धियोगदृष्टिवित्, चतुर्विधानुयोगनिपुणो विचक्षणश्चेति षट्त्रिंशद्गुणो गुरुर्जयत्विति संक्षेपार्थः । विस्तरार्थस्त्वयम्—अष्टविधानि कर्माणि ज्ञानावरणीयादीनि[1] मूलप्रकृतिरूपाणि सोत्तरप्रकृतिविस्तराण्यपि विदन् गुरुर्भवति । तानि कर्माणि च ज्ञानावरण१ दर्शनावरण२ वेदनीय३ मोहनीया४ युः५ र्नाम६ गोत्रा७ न्तरायलक्षणानि । यदाह—"इह नाण१ दंसणावर—ण२ वेय३ मोहा४ उ५ नाम६ गोयाणि७ । विग्घं च पण नव दु अ—ट्ठवीस चउतिसय दु पणविहं ॥ १ ॥" इत्यादि विस्तरः कर्मविपाकादेरवसेयः । तथा अष्टाङ्गो योगो यमनियमादिकः । यदाह—"यम१ नियमा२ सन३ पवन४-प्रत्याहाराः५ सुधारणा६ ध्यानम्७ । सुसमाधि८ श्चेत्यष्टा—वङ्गानि वदन्ति योगस्य ॥ १ ॥ अहिंसासूनृतास्तेय—ब्रह्माऽकिंचनता यमाः । नियमाः शौचं संतोषः[2], स्वाध्यायतपसी अपि ॥ २ ॥ देवताप्रणिधानं च, करणं पुनरासनम् । प्राणायामः

---

१ ब-पुस्तके—" ज्ञानावरणादीनि " इत्यपि ॥ २ " नियमाः शौचसंतोषौ " इति नाममाला ॥

प्राणयमः, श्वासप्रश्वासरोधनम् ॥ ३ ॥ प्रत्याहारस्त्विन्द्रियाणां, विषयेभ्यः समाहृतिः । धारणा तु कचिद्ध्येये, चित्तस्य स्थिरबन्धनम् ॥ ४ ॥ ध्यानं तु विषये तस्मि-न्नेकप्रत्ययसन्ततिः । समाधिस्तु तदेवार्थ-मात्राभासनरूपकम् ॥ ५ ॥" इति। तथाऽष्टौ महासिद्धयो महदै(है)श्वर्यरूपा लब्धयो लघिमाद्याः । यदाह-"लघिमा१ वशितेर२ शित्वं३, प्राकाम्यं४ महिमा ५-ऽणिमा ६ । यत्र कामावसायित्वं७, प्राप्ति८ रैश्वर्यमष्टधा ॥ १ ॥ भवेल्लघिमवानर्क-तूलादपि लघुर्लघुः। वशित्वसिद्धिमान् जन्तून्, क्रूरानपि वशं नयेत् ॥ २॥ ईशित्वशक्तिमान् शक्रा-देरपि स्यान्महर्द्धिकः। प्राकाम्यवान् भुवीवाप्सु, अप्सु वि वाप्स्विव चङ्क्रमेत् ॥ ३ ॥ महन्महिमवान्मेरो-रपि कुर्याद्वपुः क्षणात् । विशेदणिमवान् सूची-च्छिद्रेऽपि तनुतानवात् ॥ ४ ॥ भवेत्का-मावसायित्वा-त्कामचारी सदाऽपि हि । प्राप्तिप्रभावतोऽर्कादीन्, स्पृशेद्भूस्थोऽपि हेलया ॥ ५ ॥" तथा मित्रातारादयो योगदृष्टयोऽप्यष्टावेव । यदाह—"मित्रा१ तारा२ बला३ दीप्रा४, स्थिरा५ कान्ता६ प्रभा७ परा८ । नामानि योगदृष्टीनां, लक्षणं च निबोधतः ॥ १ ॥ तृणगोमयकाष्ठाग्नि-कणदीपप्रभोपमा । रत्नतारार्कचन्द्राभा, सद्दृष्टेर्दृष्टिरष्टधा ॥ २ ॥" तथा चत्वारोऽनुयोगाः चरणानुयोगाद्याः । यदाह—"चत्तारि य अणुओगा, चरणे धम्म गणियाणुओगे य दवि अणुओगे य तहा, अहक्कमं ते महिड्ढीया ॥ १ ॥ सविसयबलवत्तं पुण, जुज्जइ तहविहु महिड्ढियं चरणं । चारित्तरक्खणट्ठा, जेणियरे तिण्णि अणुओगा ॥ २ ॥ चरणपडिवत्तिहेऊ, धम्मकहा कालदिक्खमाईया । दविए दंसणसुद्धी, दंसणसुद्धस्स चरणं तु ॥ ३ ॥ जह रण्णो विसएसुं, वयरे कणगे य रयय लोहे य। चत्तारि आगरा खलु, चउण्ण पुत्ताण ते दिण्णा ॥ ४ ॥ चिंता लोहागरिए, पडिसेहं कुणइ सो उ लोहस्स । वयराईहि य गहणं, करिंति लोहस्स तिन्नियरे ॥ ५ ॥ एवं चरणंमि ठिओ,

---

१ ड. पुस्तके-"कामावशायित्वम्" इत्यपि॥

करेइ गहणं विहीइ इयरेसिं । एएण कारणेणं, हवइ हु चरणं महिड्डीयं ॥ ६ ॥" यद्वा चत्वार्युपक्रमादीन्यनुयोगद्वाराणि । यदाह—"चत्तारि अणुओगदारा पन्नत्ता । तंजहा—उवक्कमो१ निक्खेवो२ अणुगमो३ नओ४ य ॥" तेष्वपि निपुणो-विज्ञः, इत्येवं षट्त्रिंशद्गुणो गुरुर्जयतु । इति गाथार्थः ॥ ८ ॥

अथाष्टमषट्त्रिंशिकासूत्रगाथामाह—

नवतत्तण्णू नववंभगुत्तिगुत्तो नियाण नवरहिओ ।
नवकप्पकयविहारो, छत्तीसगुणो गुरू जयउ ॥ ९ ॥

व्याख्या—नवतत्त्वज्ञो, नवब्रह्मचर्यगुप्तो, निदाननवकरहितो, नवकल्पकृतविहारः, इति षट्त्रिंशद्गुणो गुरुर्जयत्विति संक्षेपार्थः । विस्तरार्थस्त्वयम्–नवतत्त्वानि जीवाजीवादीनि । यदाह—" जीवा १ जीवा २ पुण्णं ३, पावा ४ सव ५ संवरो ६ य निज्जरणा ७ । बंधो ८ मुक्खो ९ य तहा, नव तत्ता हुंति नायव्वा ॥ १ ॥" इत्यादि नवतत्त्वप्रकरणान्नवतत्त्व-विस्तरविचारोऽवसेयः । नव ब्रह्मचर्यगुप्तयस्तु कुसंसर्गादिदोषरहितवसत्यासेवनाद्याः । यदाह—" वसहि १ कह २ निसिज्जिंदिय ३, कुड्डिंतर ४ पुव्वकीलिय ५ पणीए ६ । अइमाया ७ हार ८ विभू–सणा ९ य नव बंभगुत्तीओ ॥ १ ॥ जं विवित्तमणाइन्नं, रहियं इत्थिजणेण य । बंभचेरस्स रक्खट्ठा, आलयं तु निसेवए ॥ २ ॥ मणपल्हायजणणी, कामरागविवड्ढणी । बंभचेररओ भिक्खू, थीकहं तु विवज्जए ॥ ३ ॥ समं च संथवं थीहिं, संकहं च अभिक्खणं । बंभचेररओ भिक्खू, निच्चसो परिवज्जए ॥ ४ ॥ अंगपच्चंगसंठाणं, चारुल्लवियपेहियं । बंभचेररओ भिक्खू, चक्खुगिज्झं विवज्जए ॥ ५ ॥

कुइयं रुइयं गीयं, हसियं थणियकंदियं । बंभचेररओ भिक्खू, सोयगिज्झं विवज्जए ॥ ६ ॥ हासं किड्डं रयं दप्पं, सयणं चित्तासयाणि य । बंभचेररओ थीणं, नाणुचिंते कयाइवि ॥ ७ ॥ पणीयं भत्तपाणं तु, खिप्पं मयविवड्ढणं । बंभचेररओ भिक्खू, निच्चसो परिवज्जए ॥ ८ ॥ धम्मं लद्धुं मियं कालं, जत्तत्थं पणिहाणवं ॥ बंभचेररओ भिक्खू, नाइ निद्धं तु भुंजए ॥ ९ ॥ विभूसं परिवज्जिज्जा, सरीरपरिमंडणं । बंभचेररओ भिक्खू, सिंगारत्थं न धारए ॥ १० ॥ " तदेताभिर्नवभिर्ब्रह्मचर्यगुप्तिभिर्गुप्तः । तथा नव निदानानि राजत्वाद्यभिलाषरूपाणि । यदाह—" राया १ उग्गाइसुओ २, इत्थी ३ पुरिसो ४ तहेव देवो ५ य । आयप्पयार ६ अविया ७ रसावओ ८ तह दरिद्दसुओ ९ ॥ १ ॥ जं चक्कहराईणं, पयवीए पत्थणं करे जीवो । बहुसुकयविक्कएणं, रायत्तनियाणमेयंति ॥ २ ॥ नरयनिमित्तं रज्जं, तम्हा उग्गाइसुकुलसंभूओ । हुज्जाहमिय नियाणं, जं कीरइ तमिह उग्गाइ ॥ ३ ॥ जं पुरिसो महिलत्तं, अहिलसइ तमिह इत्थियनियाणं । तं पुण पुरिसनियाणं, जं थी पुरिसत्तणं महइ ॥ ४ ॥ वेमाणियाइसुरवर-रिद्धिकए जं सुरत्तणं जीवो । पत्थइ तवेण तं पुण, देवानियाणं वियाणाहि ॥ ५ ॥ जे कामेसु अतित्ता, बहुजुयले अप्पणो विउव्वंति । देवा तेसि कए जं, नियाणमेयं अवीयारं ॥ ६ ॥ बोहिनिमित्तं सावय-कुलाहिलासो सुहो परं तहवि । कयसुकयविक्कएणं, नियाणमेयं भवनिमित्तं ॥ ७ ॥ एवं चरणत्थी जं, दरिद्दपुत्तत्तणं समहिलसइ । तं नवमनियाणंपिहु, असुहनियाणं मुणेयव्वं ॥ ८ ॥ " एतैर्निदानै रहितः । ' नवनियाणरहिओ ' इति प्रासे प्राकृतत्वाच्छन्दोभङ्गनिरासार्थं व्यत्ययेनोपन्यासः । तथा नवकल्पलक्षणं, तच्च सुप्रतीतमेव । उद्यतविहारित्वं हि सद्गुरुलक्षणम् । यतः—" समणाणं सउणाणं, भमरकुलाणं च गोकुलाणं च । अनियाओ वसहीओ,

१ ड-पुस्तके—" काले " इत्यपि । २ नातिमत्तं ३ ब-ड-पुस्तके " तेण " इत्यपि ॥

सारइयाणं च मेहाणं ॥ १ ॥ दंसणसोही[1] थिरकर–णभावणा अइयसत्थकुसलत्तं । जणवयपरिच्छणाविय, अणिययवासे गुणा हुंति ॥ २ ॥ " नित्यवासे तु दोषः । यदाह–"पडिबंधो लहुअत्तं, अजणुवयारो अदेसविन्नाणं । नाणाईण अवुड्ढी, दोसा अविहारपक्खंमि ॥ १ ॥ " इत्येवं षट्त्रिंशद्गुणो गुरुर्जयतु । इति गाथार्थः ॥ ९ ॥

अथ नवम्याः षट्त्रिंशिकायाः सूत्रगाथामाह—

दसभेयअसंवरसं–किलेसउवघायविरहिओ निच्चं ।
हासाइछक्करहिओ, छत्तीसगुणो गुरू जयउ ॥ १० ॥

व्याख्या—प्रत्येकं दशभेदभिन्नैरसंवरसंक्लेशोपघातै रहितः, तथा हास्यादिषट्करहितश्चेति षट्त्रिंशद्गुणो गुरुर्जयत्विति संक्षेपार्थः । विस्तरार्थस्त्वयम्–दशभेदोऽसंवरः पञ्चकरणत्रियोगौघोपग्रहिकोपधिष्वप्रत्याख्यानरूपः । यदाह–"दसहा असंवरो खलु, इंदियपणगस्स५ मण६ वय७ तनूणं८ । ओहोवग्गहरूवो–वहीइ१० अप्पच्चखाणेणं ॥ १ ॥" दशभेदः संक्लेशस्तु, उपध्यु१ पाश्रय२ कषाया३ हार४ मनो५ वचः६ काया७ऽज्ञाना८ऽदर्शना९ऽचारित्र१० रूपः । यदाह–"उवहि१ वसही२ कसाया३ऽऽहार४ मणो५ वय६ तणूण७ मन्नाणं८ । निद्दंसण९ मचरित्तं१०, संकिलेसो भवे दसहा ॥ १ ॥" दशधा चोपघातो यथा–उद्गमोपघातः१, उत्पादनोपघातः२, एषणोपघातः३, परिकर्मणोपघातः४, परिहरणोपघातः५, ज्ञानोपघातः६, दर्शनोपघातः७, चारित्रोपघातः८, अप्रीतिकोपघातः९, संरक्षणोपघात१० श्चेति । यदाह–"दस संजमोवघाया, अग्गम१

---

१ ब–पुस्तके–" अइपसत्थ " इत्यपि ॥

उप्पायणे२ स३ परिकम्मे४ । परिहरण५ नाण६ दंसण७ चरित्त८ आचिअत्त९ संरक्खे१० ॥ १ ॥" इत्येतैरसंवरसंक्लेशोपघातैर्विरहितः । हास्यादिषट्कं तु हास्य१ रत्य२ रति३ भय४ शोक५ जुगुप्सा६ लक्षणं सुप्रतीतमेव, तेनापि रहितः । इति षट्त्रिंशद्गुणो गुरुर्जयतु । इति गाथार्थः ॥ १० ॥

अथ दशमीषट्त्रिंशिकासूत्रगाथामाह—

दसविहसामायारी, दसचित्तसमाहिठाणलीणमणो ।
सोलसकसायचाई, छत्तीसगुणो गुरू जयउ ॥ ११ ॥

व्याख्या—सुगमैव । नवरं दशविधसामाचारी आवश्यक्यादिका । यदाह—"गमणे आवस्सियं१ कुज्जा, ठाणे कुज्जा निसीहियं२ । आपुच्छणा३ सयंकरणे, परकरणे पडिपुच्छणं४ ॥१॥ छंदणा५ दव्वजाएणं, इच्छाकारो६ य सारणे । मिच्छाकारो७ सनिंदाए, तहकारो८ पडिस्सुए ॥ २ ॥ अब्भुट्ठाणं९ गुरुपूआ, अच्छणे उवसंपया १० । एसा दसहा साहुस्स, सामायारी पवेईया ॥ ३ ॥" दश चित्तसमाधिस्थानानि स्त्रीपशुपण्डकसंसक्तशयनासनवर्जनादीनि । यदागमः—"नो इत्थीपसुपंडग-संसत्ताइं सयणासणाइं सेवित्ता भवइ१, नो इत्थीणं कहं कहित्ता भवइ२, नो पणीयरसभोई भवइ३, नो पाणभोयणस्स अमाइं[1] आहारित्ता भवइ४, नो पुव्वरयपुव्वकीलियाइं सेवित्ता भवइ५, नो इत्थीठाणइं सेवित्ता भवइ६, नो इत्थीणं इंदियाइं मणोरमाइं आलोइय आलोइय निज्झाइत्ता भवइ७, नो सद्दरूवगंधाणुवाई भवइ८, नो सिलोगाणुवाई भवइ९,

[1] ड. क. पुस्तके—"अमाइं माय" इत्यपि ॥

नो सायासुक्खपडिबद्धे भवइ १०॥" इति । कषायषोडशकं च अनन्तानुबन्ध्यादिचतुर्भेदभिन्नक्रोधादिचतुष्करूपम् । यदाह—"कोहो माणो माया, लोहो चउरोवि हुंति चउभेया । अण अप्पच्चक्खाणा, पच्चक्खाणा य संजलणा ॥१॥" 'अणत्ति' अनन्तानुबन्धिनः । तथाऽत्रोपमानादयः संज्वलनानेवादौ कृत्वा दर्शिताः । यदाह—" जलरेणुपुढविपव्वय—राईसरिसो चउव्विहो कोहो । तिणिसलयाकट्ठट्ठिय—सेलत्थंभोवमो माणो ॥ १ ॥ मायावलेहिगोमु—त्तिमिंढसिंगघणवंसमूलसमा । लोहो हलिद्दखंजण—कद्दमकिमिरागसारिच्छो ॥ २ ॥ पक्खचउमासवच्छर—जावज्जीवाणुगामिणो कमसो देवनरतिरियनारय—गइसाहणहेअवो भणिया ॥ ३ ॥ कोहो पीइं पणासेइ, माणो विणयनासणो । माया मित्ताणि नासेइ, लोहो सव्वविणासणो ॥ ४ ॥" इत्येवं दशविधसामाचारीदशचित्तसमाधिस्थानकेषु लीनमनाः, षोडशकषायत्यागी चेति षट्त्रिंशद्गुणो गुरुर्जयतु । इति गाथार्थः ॥ ११ ॥

अथैकादशीषट्त्रिंशिकासूत्रगाथामाह—

पडिसेवसोहिदोसे, दस दस विणयाइचउसमाहीओ ।
चउभेयाउ मुणंतो, छत्तीसगुणो गुरू जयउ ॥ १२ ॥

गमनिका—प्रतिसेवादोषान् दश, शोधिदोषांश्च दश, विनयादिचतुःसमाधींश्च प्रत्येकं चतुर्भेदभिन्नान् जानन्निति षट्त्रिंशद्गुणो गुरुर्जयत्विति पिण्डार्थः । स्फुटार्थस्त्वयम्—प्रतिसेवादशकं दर्पादिकम् । यदाह—"दप्प १ प्पमाय २ ऽणाभोगे ३,

पद-
॥

आउरे ४ आवईसु ५ य। संकिए ६ सहसागारे ७, भए ८ पओसे ९ य वीमंसा १० ॥ १ ॥ दप्पो उ वग्गणाई, कन्दप्पाई तहा पमाउत्ति। निस्सरणमणाभोगो, आउरे रुअखुहाईहिं ॥ २ ॥ दव्वाइअलंभे पुण, चउप्पयारा उ आवई होइ। सुद्धंमिवि संकाए, जं संके तं समासज्जे ॥ ३ ॥ पुव्विं अपासिऊणं, पाए छुढंमि ज पुणो पासे। न चएइ नियत्तेउं, पायं सहसाकरणमेयं ॥ ४ ॥ रायसीहाइभयओ, पइककहणाई य रुक्खचडणाई। कोहाईओ पओसो, वीमंसा सेहमाइणं ॥५॥ " दश शोधिदोषाः आकम्पयित्वेत्यादिकाः। यदाह—" आकंपईत्ता १ अणुमाणइत्ता २ जं दिट्ठं ३ बायरं ४ च सुहुमं ५ वा। छन्नं ६ सद्दाउलयं ७, बहुजण ८ अव्वत्त ९ तस्सेवी १० ॥ १ ॥ वेयावच्चाईहिं, पुव्विं आकंपइत्तु आयरियं। आलोएई कहं मे, थोवं वियरिज्ज पच्छित्तं ? ॥ २ ॥ धन्नो जो कुणइ तवं, अहं न सक्केमि कत्थ मे सत्ती ?। तुब्भेवि मज्झ थामं, जाणह अणुमाणणा एसा ॥३॥ दिट्ठा उ जे परेणं, दोसा वियडेइ तच्चिय न अन्ने। सोहिभया जाणंतु य, एसो एयावराहुत्ति ॥४॥ बायर बहुवराहे, जो आलोएइ सुहमए नेव। अहवा सुहमे वियडेइ, पर मन्नंतो उ एवं तु ॥ ५ ॥ जो सुहमे आलोयइ, सो कह नालोइ बायरे दोसे ? । अहवा जो बायरए, वियडइ सो किं न सुहुमे उ ? ॥६॥ असुगवराहे पत्ते, किं पच्छित्तंति पुच्छियं छन्नं। कोहं सयंति अहवा, छन्नं गुरुणोऽवि निसुणंति ॥७॥ पक्खियचाउम्मासिय—संवच्छरिएसु सोहिकालेसु। सद्दाउले कहेइ, दोसे सो होइ सत्तमओ ॥ ८ ॥ आलोइऊण गुरुणो, पायच्छित्तं पडिच्छिंयं तत्तो। तमसद्दहओ पुच्छइ, अन्नन्नं अट्ठमो दोसो ॥ ९ ॥ जो सुअपरियाएहिं, अव्वत्तो तस्स नियदुच्चरियं। आलोयंतस्स फुडं, नवमो आलोयणा-

१ नग्नादि। २ रुगाद्युपाधिभिः। ३ वशीकृत्य। ४ वितरेद्। ५ प्रायश्चित्तभयात्। ६ एतदपराध इति। ७ प्रकटयति। ८ आचार्यं प्रति। ९ अकार्यं स्वयमिति गुरवोऽपि छन्नं निश्शृण्वन्ति। १० न-पुस्तके 'पडिच्छिउं" इत्यपि। ११ अनधीतनिशीथाद्यज्ञातव्यजनस्य ॥

देसो ॥१०॥ ते चेव जोऽवराहे, सेवइ सूरी स होइ तस्सेवी । समदोसु[1] मियं दाहि—त्ति[2] तस्स आलोयणे दसमो ॥११॥" चतुर्विधानि चत्वारि विनयश्रुततपआचाररूपाणि समाधिस्थानानि। यदागमः—"चउव्विहा खलु विणयसमाही भवइ । तंजहा—अणुसासिज्जंतो सुस्सूसइ १ सम्मं संपडिवज्जइ २ वेयमाराहइ ३ न भवइ अत्तसंपग्गहिए चउत्थं पयं भवइ, भवइ य इत्थ सिलोगो—"पेहेइ हियाणुसासणं, सुस्सूस्सइ तं च पुणो अहिट्ठए । न य माणमएण सज्जइ, विणयसमाहिआयय[3]ट्ठिए ॥१॥" चउव्विहा खलु सुअसमाही भवइ। तंजहा—सुयं मे भविस्सइत्ति अज्झाईयव्वं भवइ १। एगग्गचित्तो[4] भविस्सामित्ति अज्झाइयव्वं भवइ २। अप्पाणं ठावइस्सामित्ति अज्झाइयव्वं भवइ ३। ठिओ परं ठावइस्सामित्ति अज्झाइयव्वं भवइ ४॥ चउव्विहा खलु तवसमाही भवइ। तंजहा—नो इहलोगट्ठयाए तवमहिट्ठिज्जा १, नो परलोगट्ठयाए[5] तवमहिट्ठिज्जा[6] २, नो कित्तिवण्णसद्दसिलोगट्ठयाए तवमहिट्ठिज्जा ३, नन्नत्थ निज्जरट्ठयाए तवमहिट्ठिज्जा ४ ॥३॥ चउव्विहा खलु आयारसमाही भवइ। तंजहा—नो इहलोगट्ठयाए आयारमहिट्ठिज्जा १, नो परलोगट्ठयाए आयारमहिट्ठिज्जा २, नो कित्तिवण्णसद्दसिलोगट्ठयाए आयारमहिट्ठिज्जा ३, नन्नत्थ आरिहंतेहिं[7] हेऊहिं आयारमहिट्ठिज्जा ४॥" इत्येवं षट्त्रिंशद्गुणो गुरुर्जयतु । इति गाथार्थः ॥ १२॥

अथ द्वादशीषट्त्रिंशिकासूत्रगाथामाह—

दसविहवेआवच्चं, विणयं धम्मं च पडु पयासंतो। वज्जियअकप्पछक्को, छत्तीसगुणो गुरू जयउ ॥१३॥

व्याख्या—दशविधवैयावृत्त्यं, दशविधविनयं, दशविधं धर्मं च पटु प्रकाशयन् वर्जिताकल्पषट्कश्चेति षट्त्रिंशद्गुणो

---

१ समदोष इति । २ दापयतीति । ३ मोक्षार्थिकः । ४ अध्यापयितव्यं अध्येतव्यं वा । ५ स्वर्लोकादि । ६ अधितिष्ठेत् । ७ अर्हत्प्रणीतैः ॥

गुरुर्जयत्विति संक्षेपार्थः। विस्तरार्थस्त्वयम्—दशविधं वैयावृत्त्यं आचार्यादिविषयम्। यदाह—"आयरिय१ उवज्झाए२, तवस्सि३ सेहे४ गिलाण५ साहूस्सुं६। समणुन्न७ संघ८ कुल९ गण१०—वेआवच्चं हवइ दसहा ॥ १ ॥" अत्र समनोज्ञाः समानधर्माणः, सङ्घश्चतुर्विधः, कुलमेकपुरुषसंततिरूपम्, तत्समुदायो गणः। तथा दशविधो विनयोऽर्हदादिविषयः। यदाह—"अरिहंत१ सिद्ध२ चेइय३, सुए४ य धम्मे५ य साहुवग्गे६ य। आयरिय७ उवज्झाए८, पवयणे९ दंसणे१० विणओ ॥१॥ अरिहंता विहरंता, सिद्धा कम्मक्खया सिवं पत्ता। पडिमाओ चेइयाइं, सुयं च सामाइयाईयं ॥२॥ धम्मो चरित्तधम्मो, आहारो तस्स साहुवग्गुत्ति। आयरियउवज्झाया, विसेसगुणसंगया[2] तत्थ ॥ ३ ॥ पवयणमसेससंघो, दंसणमिच्छंति इत्थ सम्मत्तं। विणओ दसण्हमेसिं, कायव्वो होइ एवं[3] तु ॥ ४ ॥ भत्ती बहुमाणो व—ण्णजणण नासणमवण्णवायस्स। आसायणपरिहारो, विणओ संखेवओ एसो ॥ ५ ॥" तथा दशविधो धर्मः क्षान्त्यादिको यतिधर्मः। यदाह—"खंती १ मद्दव २ अज्जव ३, मुत्ती ४ तव ५ संजमे ६ य वोद्धव्वे। सच्चं ७ सोयं ८ आकिं—चणं ९ च बंभं १० च जइधम्मो ॥ १ ॥ कोहस्स निग्गहो खंती, मद्दवो माणनिग्गहो। अज्जवो य अमाइत्तं, मुत्ती लोहस्स निग्गहो ॥ २ ॥ तवो इच्छानिरोहो य, संजमो पाणिणं दया। सच्चं हियं मियं वक्कं, सोअमज्झप्पसोहणं ॥ ३ ॥ आकिंचणमगं थत्तं, बंभं मेहुणवज्जणं। एसो दसविहो साहु—धम्मो सव्वन्नुदेसिओ ॥ ४ ॥ एयं दसविहं धम्मं, जे चरंति महेसिणो। ते संसारसमुद्दस्स, पारं गच्छंति नीरया ॥ ५ ॥" अकल्पनीयादिषट्कं प्रतीतमेव। यदुच्यते—"अकप्पाईण छक्कं तु, अकप्पो गिहिभायणं। पलियंकानि-

१ नवदीक्षित । २ ड-पुस्तके-" सपया जत्थ " इत्यपि । ३ व-पुस्तके-" एय " इत्यपि ॥

सिज्जाए, सिणाणं सोहवज्जणं ॥ १ ॥" एतद्विस्तरस्तु श्रीदशवैकालिकादवसेयः। इत्येवं षट्त्रिंशद्गुणो गुरुर्जयतु। इति गाथार्थः ॥ १३ ॥

अथ त्रयोदशीषट्त्रिंशिकासूत्रगाथामाह—

दसभेयाइ रुईएं, दुवालसंगेसु[१२] बारुवंगेसु[१२]। दुविहसिक्खा[२]इनिउणो, छत्तीसगुणो गुरू जयउ ॥१४॥

व्याख्या—दशभेदायां रुचौ, द्वादशाङ्गेषु, द्वादशोपाङ्गेषु, द्विविधशिक्षायां च निपुण इति षट्त्रिंशद्गुणो गुरुर्जयत्विति मुकुलितार्थः। विकसितार्थस्त्वयम्—दशभेदा रुचिर्निसर्गोपदेशादिका। यदाह—" निस्सग्गु १ वएसरुई २, आणरुई ३ सुत्त ४ बीय ५ रुइमेव। अभिगम ६ वित्थाररुई ७, किरिया ८ संखेव ९ धम्म १० रुई ॥१॥ जो जिणदिट्ठे भावे, चउव्विहे सद्दहेइ सयमेव। सो होइ निसग्गरुई, तव्विवरीओवएसरुई ॥ २ ॥ जिणआणं मन्नंतो, जीवो आणारुई मुणेयव्वो। अंगोवंगाईयं, मन्नंतो होइ सुत्तरुई ॥ ३ ॥ एगपयाणेगपए, जस्स मई पसरए स बीयरुई। सो होइ अभिगमरुई, सुत्तं जेणित्थ ओदिट्ठं ॥ ४ ॥ जो मुणइ सव्वभावे, सव्वपमाणेहिँ वित्थररुई सो। समियाइसु आउत्तो, जो खलु किरियारुई सो उ ॥ ५ ॥ सो संखेवरुई जो, चिलाइपुत्तु व्व बुज्झई तत्तं। सद्दहइ जिणाभिहियं, जो धम्मं सो हु धम्मरुई ॥ ६ ॥" द्वादशाङ्गी तु आचारादिदृष्टिवादान्ता। यदागमः—" नमो तेसिं खमासमणाणं जेहिं इमं वाइयं दुवालसंगं गणिपिडगं भगवंतं, तंजहा—आयारो १, सूयगडो २, ठाणं ३, समवाओ ४, विवाहपन्नत्ती ५, नायाधम्मकहाओ ६, उवासगदंसा-

---

१ स्नानम् ॥

ओ ७, अंतगडदसाओ ८, अणुत्तरोववाईयदसाओ ९, पण्हावागरणं १०, विवागसुअं ११, दिट्ठिवाओ १२ ॥ " इति। द्वादशोपाङ्गी तु औपपातिकादिलक्षणा। यदाहुः—" उवाइयं १ रायपसे-णीयं २ तह जीवभिगमं ३ पन्नवणा ४। जंबूपन्नत्ती ५ चंद ६-सूरपन्नत्ति ७ नामाओ ॥ १ ॥ निरयावलिया ८ कप्पा-वयंस ९ पुप्फी य १० पुप्फचूली य ११। वण्हीदसा उ १२ एवं, बारसुवंगाण नामाइं ॥ २ ॥ " द्विविधा शिक्षा, ग्रहणा १ ऽऽसेवना २ लक्षणा। यदाह—" सिक्खा नाम परिण्णा, सा पुण दुविहा सुए समक्खाया। पढमा गहणपरिण्णा १, बीया आसेवणपरिण्णा २ ॥ १ ॥ " इत्येवं षट्त्रिंशद्गुणो गुरुर्जयतु। इति गाथार्थः ॥ १४ ॥

अथ चतुर्दशीं षट्त्रिंशिकामाह—

एगार सड्ढपडिमा[11], बारसवय[12] तेरकिरियठाणे[13] य। सम्मं उवएसंतो, छत्तीसगुणो गुरू जयउ ॥१५॥

व्याख्या—कण्ठ्या। नवरं एकादश श्राद्धप्रतिमा दर्शनप्रतिमादिकाः। यदाह—" दंसण१ वय२ सामाइय३, पोसह४ पडिमा५ अबंभ६सच्चित्ते७। आरंभ८ पेस९ उद्दि-ट्ठ१० वज्जए समणभूए११ य ॥१॥ एगाइमासवुड्ढीए, एयाओ हुंति कालओ। अणुट्ठाणं पुणो एवं, पढमाए सुद्धदंसणं ॥२॥ बीया पडिमा नेया, सुद्धाणुव्वयपालणं। सामाइयपडिमा उ, सुद्धं सामाइअं चिय ॥ ३ ॥ अट्ठमीमाइपव्वेसु, सम्मं पोसहपालणं। सेसाणुट्ठाणजुत्तस्स, चउत्थी पडिमा इय ॥ ४ ॥ निकंपो काउस्सग्गं तु, पुव्वुत्तगुणसंजुओ। करेइ पव्वराइसुं, पंचमी पडिमा इमा ॥ ५ ॥ छट्ठीए बंभयारी सो, फासुयाहारसत्तमी। वज्जे सावज्जमारंभं, अट्ठमिं पडिवण्णओ ॥ ६ ॥ अवरेणावि आरंभं, नवमी नो करावए। दसमी पुण उद्दिट्ठं, फासुयंपि न भुंजए

॥ ७ ॥ इक्कारसीइ निस्संगो, धरेइ लिंगं पडिग्गहं । कयलोओ सुसाहुव्व, पुव्वुत्तगुणसायरो ॥ ८ ॥ नाममित्तमिमं वुत्तं, किंचिमित्तं सरूवओ । उवासगपडिमाणं च, विसेसो सुयसायरे ॥ ९ ॥ " तथा द्वादशसंख्यानि श्राद्धव्रतानि स्थूलप्राणातिपातनिवृत्त्यादीनि । यदाह—" पाणिवह १ मुसावाए २, अदत्त ३ मेहुण ४ परिग्गहे ५ चेव । दिसि ६ भोग ७ दंड ८ समइय ९, देसे १० पोसह ११ ऽतिहिविभागे १२ ॥ १ ॥ संकप्पानिरवराहं, दुहा तिहा तसजिआ न हंतव्वा । कन्नालियाइपमुहं, थूलालीयं न वत्तव्वं ॥ २ ॥ खत्तखणणाइचोरं–कारकरमदत्तयं न घेत्तव्वं । परदारपरीहारो, अहवावि सदारसंतोसो ॥ ३ ॥ धणधन्नाइपरिग्गह–परिमाणं माणवेहि[१] कायव्वं । किच्चा सयलदिसासुं, अवही अवहीरिउं लोहं ॥ ४ ॥ महुमंसाईचाया, कायव्वा विगइपमुहपरिसंखा । जहसत्तिऽणत्थदंडो, वज्जेयव्वो अइपयंडो ॥ ५ ॥ समभावो सामइयं, खणिएणं तं सयावि कायव्वं । देसावगासियं पुण, सयलवयाणंपि संखिवणं ॥ ६ ॥ देसे सव्वे य दुहा, ससत्तिपोसहवयं विहेयव्वं । साहूण सुद्धदाणं, भत्तीए संविभागवयं ॥ ७ ॥ एवं दुवालसविहं, गिहिधम्मं पाणिणो विहियविहिणो । कमसो विसोहिउं क–म्मकयवरं जंति परमपयं ॥ ८ ॥ " त्रयोदशक्रियास्थानानि अर्थानर्थादीनि । यदाह—" अट्ठा १ ऽणट्ठा २ हिंसा ३–ऽकम्हा ४ दिट्ठि ५ य मोस ६ दिन्ने ७ य । अज्झत्थ ८ माण ९ मित्ते १०, माया ११ लोहे १२ रिआवहिया १३ ॥१॥" तत्रार्थक्रिया अर्थदण्डरूपा १ । तद्विपरीताऽनर्थक्रिया २ । हिंसाक्रिया प्राणिवधलक्षणा ३ । सहसाकारेण आकस्मिकीक्रिया ४ । दृष्टिभ्रमाद् दृष्टिकीक्रिया ५ । अलीकरूपा मृषाक्रिया ६ । अदत्ताक्रिया स्तेयलक्षणा ७ । अध्यात्मक्रिया चित्तकलमलकरूपा ८ । मानाक्रिया अहङ्कृतिरूपा ९ । अमित्रक्रिया द्वेषलक्षणा १० । मायाक्रिया चित्तकौटिल्यप्रधाना ११ । लोभक्रिया गृद्धिरूपा १२ । ईर्यापथिकीक्रिया केवलि-

१ सकलादिशासु अवधिः कार्यः अवधीर्य लोभम् ॥

नामेकसामयिकरूपा १३ । इति गाथार्थः ॥ १५ ॥

अथ पञ्चदशीं षट्त्रिंशिकामाह—

बारसउ[१२]वओगविऊ, दसविहपच्छिं[१०]त्तदाणनिउणमई । चउदसउव[१४]गरणधरो, छत्तीसगुणो गुरू जयउ १६ ॥

व्याख्या—सुबोधैव । नवरं उपयोगद्वादशकं ज्ञानपञ्चकाऽज्ञानत्रिकदर्शनचतुष्कलक्षणम् । यदाह—"नाणं पंचविहं तह, अन्नाणतिगं च अट्ठ सागारा । चउ दंसणमणगारा, बारस जियलक्खणुवओगा ॥ १ ॥" दशविधप्रायश्चित्तं त्वालोचनादिकम् । यदाह—"तं द[२]सविहमालोयण–पडिकमणोभयविवेगउस्सग्गे । तवछेअमूलअणव–ट्ठिए अ पारंचिए चेव ॥ १ ॥ उ[३]द्धरणमलणपूरण–गालणमियभमणअसणजयणा य । तत्तियतयंगछेअण–मफासवाओ वणे उवमा ॥ २ ॥" चतुर्दशोपकरणानि मुखवस्त्रिकादीनि । यदाह—"मुहपुत्ती रयहरणं, कप्पातियं सत्त पत्तउवगरणे । मत्तं च चोलपट्टो, उवही थेराण चउदसहा ॥ १ ॥ पत्तं पत्ताबंधो, पायट्ठवणं च पाय[४]केसरिया । पडलाइँ रयत्ताणं, गुच्छओ पाय[५]निज्जोगो ॥ २ ॥" इति गाथार्थः ॥ १६ ॥

अथ षोडशीं षट्त्रिंशिकामाह—

बारसभेयंमि त[१२]वे, भिक्खू[१२]पडिमासु भाव[१२]णासुं च । निच्चं च उज्जमंतो, छत्तीसगुणो गुरू जयउ ॥ १७ ॥

व्याख्या—कण्ठ्या । नवरं द्वादशभेदं तपोऽनशनादिरूपम् । यदागमः—"अणसण १ मूणोयरिया २, वित्तीसंखेवणं ३ रसच्चाओ ४ । कायकिलेसो ५ संली–णया ६ य बज्झो तवो होइ ॥ १ ॥ पायच्छित्तं १ विणओ २, वेयावच्चं ३ तहेव

---

१ ईदृशो हि बन्धस्तेषाम् । २ ब–पुस्तके–"आलोयण पडिक्कमणे, मीस विवेगे तहेव उस्सग्गे" इत्यपि । ३ उद्धरण मर्दन पूरणं (कण्टकाद्यादे.) गालन (पूयरुधिरादे.) मितभ्रमणं अन्नानयतना तावत्तदङ्गच्छेदने अस्पर्शवादो व्रणे उपमा (तथा अन्नालोचनादौ) । ४ पात्रप्रमार्जनचीवरखण्ड. । ५ पात्रोपकरणानि ॥

सज्झाओ ४ । झाणं ५ उस्सग्गोऽवि य ६, अब्भितरओ तवो होइ ॥ ३ ॥ " द्वादश भिक्षुप्रतिमास्त्वेकमासादिकाः । यदागमः—" मासाई सत्तंता ७, पढमा बीय ८ तइय ९ सत्तराइदिणा १० । अहराई ११ एगराई १२, भिक्खूपडिमाण बारसगं ॥ १ ॥ पडिवज्जइ एयाओ, संघयणधिईजुओ महासत्तो । पडिमाउ भाविअप्पा, सम्मं गुरुणा अणुन्नाओ ॥ २ ॥ गच्छे च्चिय निम्माओ जा पुव्वा दस भवे असंपुण्णा । नवमस्स तइय वत्थुं, होइ जहन्नो सुयाभिगमो ॥ ३ ॥ वोसट्ठचत्तदेहो, उवसग्गसहो जहेव जिणकप्पी । एसणअभिग्गहीया, भत्तं च अलेवडं तस्स ॥ ४ ॥ गच्छा विनिक्खमित्ता, पडिवज्जइ मासियं महापडिमं । दत्तेगभोअणस्स व, पाणस्स व तत्थ एग भवे ॥ ५ ॥ जत्थऽत्थमेई सूरो, न तओ ठाणा पयंपि चालेइ । ता एगराइवासी, एगं च दुगं च अन्नाए ॥ ६ ॥ दुट्ठाण हत्थिमाईण, नो भएणं पयंपि ओसरइ । एमाइनियमसेवी, विहरइ जाऽखंडिओ मासो ॥ ७ ॥ पच्छा गच्छमुवेई, एवं दुमास तिमास जा सत्त । नवरं दत्ती वड्ढइ, जा सत्त उ सत्तमासीए ॥ ८ ॥ तत्तो य अट्ठमीआ, भवई इह पढम सत्तराइंदी । तीए चउत्थचउत्थेण, अपाणएणं अह विसेसो ॥ ९ ॥ " पारणके चाचाम्लं दत्तिनियमो नास्तीति । " उत्ताणो पासिल्लो, नेसोज्जिओवि ठाणठाइत्ता । सहइ उवसग्ग घोरे, दिव्वाई तत्थ अविकंपो ॥ १० ॥ दुच्चावि एरिस च्चिय, बहिया गामाइयाण नवरं तु । उक्कुडलगंडसाई, दंडायय उच्चठाइत्ता ॥ ११ ॥ तच्चावि एरिस च्चिय, नवरं ठाणं च तत्थ गोदोही । वीरासणमहवावी, ठाइत्ता अंबखुज्जो वा ॥ १२ ॥ एमेव अहोराई, छट्ठं भत्तं अपाणगं नवरं । गामनगराण

१ व्युत्पन्नः (निष्पन्नः)। २ परीषहोपसर्गसहनायार्पणात् संस्कारवर्जनाच्च । ३ भक्तैषणादि साभिग्रह । ४ अलेपकृत् । ५ सकृतप्रक्षेपलक्षणा । ६ अपसरति अन्यमार्गे । ७ ध-पुस्तके-" अवि " इत्यपि । ८ उत्तानः (ऊर्ध्वमुखशायी) पार्श्वशायी नैषधिकः स्थानमूर्ध्वस्थान कायोत्सर्गस्तेन स्थाता । ९ उ-पुस्तके-" नेसज्जिओव ठाणठाइत्तो " इत्यपि । १० उत्कटुकासनः वक्रकाष्ठवच्छेते वा दण्डवदायत । ११ ध-पुस्तके-" तु " इत्यपि । १२ अपनीतासिंहासनवरस्थानम् । १३ आम्रवत्कुब्जतया ॥

बहिया, वग्धारियपाणिए ठाणं ॥ १३ ॥ एमेव एगराई, अट्ठमभत्तेण ठाणबाहिरओ । ईसीपब्भारगए, अणिमिसनयणेगदिट्ठी य ॥ ॥१४॥" एतस्यामेकरात्रिप्रतिमायां लाभास्त्रयः—"एगराइयं भिक्खूपडिमं पालेमाणस्स ओहिनाणे वा मणपज्जवनाणे वा केवलनाणे वा समुप्पज्जइ " इति ॥ द्वादश भावनाश्च अनित्यतादिकाः । तथाहि—"ताओऽणिच्चमसरणं, भवमेगत्तं अनत्त असुइत्तं । आसव संवर निज्जर, सुधम्म तियलोय बोही य ॥ १ ॥ धणसयणगेहदेहा—उरूवतारुण्णसुहपहुत्ताइं । अच्चंतमणिच्चाइं, पडिबंधो तेसु को ? जीव ! ॥ २ ॥ पियमायभायजाया—सुयहयगयसुहडकोडिमज्झेवि । रंकु व्व सरणहीणो, ही हीरइ मच्चुणा जीवो ॥ ३ ॥ अन्नन्नकायजाईगयनत्तयवेयवयपरावत्ता । रे जियं ! भवरंगगओ, नडु व्व नडिओऽसि कह न तुमं ? ॥ ४ ॥ इह दुहसुहजम्मणमर—णबंधमुक्खाइँ हुंति इक्कस्स । जीवस्स ता तुमं कीस ?, कुणसि सयणेसु पडिबंधं ॥ ५ ॥ अन्नं इमं सरीरं, अन्नो जीवुत्ति निच्छओ एसो । ता किं कुणसि ममत्तं, देहे रे जीव ! दुहगेहे ॥ ६ ॥ कलिलमलरुहिरवसमं—सपित्तमुत्तंतअट्ठिभरियंपि । कुहियकलेवरमेयं, हद्धी मुद्धो मुणइ सुद्धं ॥ ७ ॥ मिच्छत्तपमायाविर—इजोगपमुहा हु आसवदुवारा । कम्मेहिँ जलेहि व पू—रयंति आयं तलायं व ॥ ८ ॥ सम्मापमायविरई—गुत्तीपमुहेहिँ दढकवाडेहिं । संवरियासवदारं, आयतलायं लहुं कुणसु ॥ ९ ॥ खलियनवकलिलसलिला—गमोऽवि पुव्वकयपावपंकाओ । छुट्टसि न जीव ! तववा—रसप्पतावं विणा कहवि ॥ १० ॥ कत्थवि किया न सुदया, कत्थवि सुदया न निम्मला समया । समयादयाकिवाहिं, पवत्तिओ जयइ जिणधम्मो ॥ ११ ॥ जत्थ भमिओऽसि पुव्विं, अणंतसो जीव ! जोणिलक्खेसु । तं लोगसरूवं चिय, चिंततो कुणसु सुहझाणं ॥१२॥ को जाणइ लब्भइ वा, न वत्ति बोही पुणोऽवि रे जीव ! । ता इह लहिउं बोहिं, सुहोवमं कुणसु रंक ! धुवं ॥१३॥"

१ प्रलम्बितभुजद्वंद्वतया । २ अवनतेषदग्रभागः । ३ कोटिमध्यादपि । ४ वेदवयःपरावर्त्तात् । ५ अ-ड-पुस्तके—" जीव " इत्यपि । ६ समतादयाक्रियाभिः । ७ आधाराद्युपमितम् ॥

इत्येवं षट्त्रिंशद्गुणो गुरुर्जयतु । इति गाथार्थः ॥१७॥

अथ सप्तदशीं षट्त्रिंशिकामाह—

चउदसगुणठाणनिउणो, चउदसपडिरूवपमुहगुणकलिओ। अट्ठसुहुमोवएसी, छत्तीगुणो गुरू जयउ॥

व्याख्या—गदितार्था । नवरं चतुर्दशगुणस्थानानि मिथ्यादृष्ट्यादीनि । यदाह—" मिच्छे सासण मीसे, अविरय देसे पमत्त अपमत्ते । नियट्टि अनियट्टि सुहुम, उवसमखीण सजोगि अजोगिगुणा ॥१॥ जीवाइपयत्थेसुं, जिणोवइट्ठेसु जा असद्दहणा । सद्दहणा वि य मिच्छा, विवरीयपरूवणाएँ य ॥ २ ॥ संसयकरणं जंपि य, जो तेसु अणायरो पयत्थेसुं । तं पंचविहं मिच्छं, तद्दिट्ठी मिच्छदिट्ठी य ॥ ३ ॥ उवसमअद्धाइठिओ, मिच्छमपत्तो तमेव गंतुमणो । सम्मं आसायंतो, सासायणिमो मुणेयव्वो ॥ ४ ॥ जह गुडदहिणी महिया–णि भावसहियाणि हुंति मीसाणि। भुंजंतस्स तहोभय, तद्दिट्ठी मीसदिट्ठी य ॥५॥ तिविहेवि हु सम्मत्ते, थेवावि न जस्स विरइ कम्मवसा । सो अविरइत्ति भण्णइ, देसे पुण देसविरई य ॥ ६ ॥ विगहाकसायनिद्दा–सद्दाइरओ भवे पमत्तुत्ति पंचसमिओ तिगुत्तो, अपमत्तजई मुणेअव्वो ॥७॥ अप्पुव्वं अप्पुव्वं, जहुत्तरं जो करेई ठिइकंडं । रसकंडं तग्घायं, सो होइ अपुव्वकरणो य ॥८॥ विणियट्टंति विसुद्धिं, समयपइट्ठावि जं च अन्नुन्नं। तत्तो नियट्टिठाणं, विवरीयमओ अ अनियट्टी ॥९॥ थूलाण लोहखंडा–ण वेयगो बायरो मुणेयव्वो । सुहूमाण होइ सुहुमो, उवएसंतेणं तु उवसंतो ॥१०॥ खीणम्मि मोहणिज्जे, खीणकसाओ सजोगजोगुत्ति । हुंति पउत्ता य तओ, अपवत्ता हुंति हु अजोगी ॥ ११ ॥ " चतुर्दश प्रतिरूपप्रमुखा गुणाः प्रतीता एव। यथा—" पडिरूवो तेयस्सी, जुगप्पहाणागमो महुरवक्को । गंभीरो धिइमंतो, उवए-

१ "विपरीयपरूवणा जा य" इत्यपि । २ युगपत्प्रविष्टा अपि ॥

सपरो य आयरिओ ॥ १ ॥ अपरिस्सावी सोमो, संगहसीलो अभिग्गहमई य । अविकत्थणो अचवलो, पसंताहियओ गुरू होइ ॥ २ ॥" अष्ट सूक्ष्माणि स्नेहसूक्ष्मादीनि । यथा—"सिणेहं१ पुप्फसुहुमं२ च, पाणु३ त्तिंगं४ तहेव य । पणगं५ वीय६ हरियं७ च, अंडसुहुमं८ च अट्ठमं ॥ १ ॥" इति गाथार्थः ॥ १८ ॥

अथाष्टादशीं षट्त्रिंशिकामाह—

पंचदसजोग[१५]सन्ना[१५]—कहणेण तिगारव[३]ाण चाएण । सल्लतिग[३]वज्जणेणं, छत्तीसगुणो गुरू जयउ ॥१९॥

व्याख्या—गतार्थैव । पञ्चदश योगाः सत्यमनःप्रभृतयः । यदाह—"सच्चं१ मोसं२ मीसं३, असच्चमोसं मणं तह वई य । उरल विउव्वाहारा, मीस्सा कम्मिग पनर जोगा ॥ १ ॥" एतद्भमनिका—अस्ति जीवः सदसद्रूपो वा देहमात्रव्यापक इत्यादि यथाऽवस्थितवस्तुविकल्पनपरं सत्यं मनः १ । जल्पनपरं सत्यं वचः २ । तद्विपरीतं मनो वचो वाऽसत्यम् ४ । धवखदिरपलाशादिषु अशोकसद्भावादसत्यम्, तेषामपि संभवात् सत्यमिति मिश्रविकल्पनपरं मनो वचो वा मिश्रम् ६ । आमन्त्रणप्रज्ञापनादिरूपं हे देवदत्त! घटमानय, धर्मं कुरु, इत्यादि विकल्पनजल्पनपरं मनो वचो वाऽसत्याऽमृषम् ८ । औदारिककाययोगः१, ओदारिकमिश्रकाययोगः २, वैक्रियकाययोगः ३, वैक्रियामिश्रकाययोगः ४, आहारककाययोगः ५, आहारकमिश्रकाययोगः ६, कार्मणकाययोगः ७ चेति पञ्चदश योगाः । पञ्चदशसंज्ञास्त्वाहारसंज्ञादिकाः । यदाह—"चउसन्नाहाराई, दससन्न कसायओघलोगजुया । पनरससन्ना सुहदुक्खमोहविचिगिच्छसोअजुया ॥१॥" तत्राहारसंज्ञा जलाद्याहारग्राहिणस्तृणादेरिव १ ।

१ व=पुस्तके—"पलाशादिमिश्रेषु" इत्यपि । २ धवदनामित्यादिवाक्ये ॥

भयमोहनीयोदयाद्भयसंज्ञा, संकोचिनीवल्ल्यादेरिव २। लोभमोहनीयोदयात्परिग्रहसंज्ञा, तन्तुभिर्वृक्ष्यादि वेष्टयन्त्या वल्ल्यादेरिव ३। वेदमोहनीयोदयान्मैथुनसंज्ञा, चम्पकतिलकाशोकादीनामिव ४। क्रोधोदयात्क्रोधसंज्ञा, कूपादाक्रोशकं प्रति धावतः पारदादेरिव ५। मानोदयान्मानसंज्ञा, हुंकारान्मुञ्चतः कोकनदकन्दादेरिव ६। मायोदयान्मायासंज्ञा, दलैः फलान्याच्छादयन्त्याश्चिर्भटिकावल्ल्यादेरिव ७। लोभोदयाल्लोभसंज्ञा, निधानं प्ररोहैर्वेष्टयतो विल्वपलाशादेरिव ८। ज्ञानोपयोगरूपा ओघसंज्ञा, संचरज्जनमार्गं परिहरन्त्या वृत्याद्यारोहन्त्या लतादेरिव ९। दर्शनोपयोगरूपा लोकसंज्ञा, सूर्योदयाद्विकसतः कमलादेरिव १०। साताऽसातानुभवरूपे सुखदुःखसंज्ञे, सर्वजीवानां प्रतीते १२। मिथ्यादर्शनरूपा मोहसंज्ञा, सूर्याभिमुखहस्तयोजिकौषध्यादेरिव १३। विप्लुतिरूपा विचिकित्सा, सा चाऽशुचिस्पर्शाद्दृष्टिदोषादेर्वा म्लानिं भजन्त्यास्तथाविधवल्ल्यादेरिव १४। शोकमोहनीयोदयाच्छोकसंज्ञा, अश्रूणि विमुञ्चन्त्या रुदन्तीवल्ल्यादेरिव १५। गारवत्रिकं च ऋद्धि १ रस २ सात ३ लक्षणम्। तथा चाह श्रीधर्मदासगणिः—" पवराइं वत्थपाया–सणोवगरणाइँ एस विभवो मे। अविय महाजणनेया, अहंति अह इड्ढिगारविओ ॥ १ ॥ अरसं विरसं लूहं, जहोववण्णं च निच्छए भुत्तुं। निद्धाणि पेसलाणि य, मग्गइ रसगारवे गिद्धो ॥ २ ॥ सुस्सूसई सरीरं, सयणासणवाहणापसंगपरो। सायागारवगुरुओ, दुक्खस्स न देइ अप्पाणं ॥ ३ ॥" शल्यत्रिकं माया १ निदान २ मिथ्यादर्शन ३ शल्यरूपम्। यदाह—"पढमं मायासल्लं १, नियाणसल्लं २ तहा भवे वीयं। तइयं मिच्छादंसण–सल्लं ३ भणियं कडुविवागं ॥ १ ॥ एएहिं सल्लेहिं, सल्लियहियओ मरेइ जो जीवो। सो असुहासुं गच्छइ, गईसु बहुसो चिणिअपावो ॥ २ ॥" इति गाथार्थः १९ ॥

॰ षद्
८ ॥

अथैकोनविंशातितमीं षट्त्रिंशिकामाह—

सोलससोलसउग्गम–उप्पायणदोसविरहियाहारो ।
चउविहभिग्गहनिरओ, छत्तीसगुणो गुरू जयउ ॥ २० ॥

व्याख्या—प्रकटार्था । नवरं षोडशोद्गमदोषा आधाकर्मादयः । यदाह—"आहाकम्मु १ द्देसिय२–पूइयकम्मे ३ य मीसजाए४ य । ठवणा५ पाहुडियाए६, पाओयर७ कीय८ पामिच्चे९ ॥१॥ परिअट्टिए१० अभिहड११–ब्भिन्ने१२ मालोहडे१३ य अच्छिज्जे १४ । अणिसिट्ठ१५ ज्झोयरए१६, सोलस पिंडुग्गमे दोसा ॥ २ ॥" तद्भमनिका चेयम्–यत् षट्कायविराधनया यतिन आधाय संकल्पेनाशनादिकरणं तदाधाकर्म १ । यत्पुनर्गृहिणा स्वार्थं कृतं पश्चाद्यत्युद्देशेन पृथक् क्रियते तदौद्देशिकम् । तत्त्रेधा, तत्र यद्यथाभूतं समुद्धृतं तत्तथाभूतमेव यावदर्थिकादीनां चतुर्णामुद्दिश्यमानमुद्दिष्टौद्देशिकम् १ । यत्पुनः कूरादि दध्यादिना व्यञ्जनादिना वा जीवविराधनां विना संस्क्रियते तत्कृतौद्देशिकम् २। यत्त्वग्न्यादिना जीवविराधनापूर्वं संस्क्रियते तत्कर्मौद्देशिकम् ३ ॥ तत्त्रिविधमपि चतुर्धा–यावदर्थिकसमुद्देशम् १ । पाषण्डिकार्थं समुद्देशम् २ । श्रमणेभ्य आदेशम् ३ । निर्ग्रन्थेभ्यः समादेशम् ४ ॥ एवं द्वादशधा औद्देशिकम् । यदुद्गमकोटिदोषदुष्टसङ्गात् शुद्धमपि अपवित्रं तत्पूतिकर्म ३ । यदात्मनो हेतोर्गृहस्थेन यावदर्थिकादिहेतोश्च मिलितमारभ्यते तन्मिश्रम् ४ । यद्यतिनिमित्तं गृही स्थापयित्वा मुञ्चति तद्वृत्ततः स्थापना ५ । यत्स्वनिमित्तमपि गृही व्रतिन आजिगमिषून् जिगमिषून् वा ज्ञात्वा अर्वाक् परतो वा तदर्थमारभते तत्प्राभृतिका ६ । यन्महान्धकारस्थितस्य यतिनिमित्तं दीपादिना प्रकटनं वहिरालोके नयनं वा तत्प्रादुष्करणम् ७ । यत्स्वकीयपरकीयाभ्यां मूल्येन विसाधितं तत्क्रीतम् ८ । यदुच्छिन्नं याचित्वा गृही दत्ते तत्प्रामित्यम् ९ । यत्पुनः परावर्त्य गृही यतिभ्यो दत्ते तत्प्रा(परा)वर्ति-

तम् १० । यद्ग्रामान्तराद्गृहाद्वा यतिनिमित्तमानीतं तदाहृतम् ११ । यन्मुद्रितकुतुपादिमुखं यतिहेतोरुन्मुद्र्य गृही घृतादि दत्ते तदुद्भिन्नम् १२ । यत्करदुर्ग्राह्यं मालादिभ्य उत्तार्य गृही दत्ते तन्मालापहृतम् १३ । यद्बलात्कस्मादपि उद्दाल्य गृही दत्ते तदाच्छेद्यम् १४ । यद्बहुसाधारणं अन्यैरदत्तं एको गृही दत्ते तदनिसृष्टम् १५ । यद्गृहिणा मूलारम्भे स्वार्थकृते तन्मध्ये यतिनिमित्तमधिकावतारणं सोऽध्यवपूरकः १६ । इत्युद्गमदोषाः षोडश ॥ " धाई दूइ निमित्ते, आजीव वणीमगे तिगिच्छा य । कोहे माणे माया, लोभे य हवंति दस एए ॥ १ ॥ पुव्विं पच्छा संथव, विज्जा मंते य चुण्णजोगे य । उप्पायणाइ-दोसा, सोलसमे मूलकम्मे य ॥ २ ॥ " यदा पिण्डार्थं दातुरपत्यानामङ्कारोपणादिलालनं करोति तदा धात्रीदोषः १ । पिण्डार्थमेव संदेशकनयनादिकरणे दूतीदोषः २ । पिण्डार्थं लाभालाभकथने निमित्तदोषः ३ । पिण्डार्थं दातुः सत्कजात्यादि स्वस्य प्रकाशयतः[1] आजीवनादोषः ४ । यो दाता यद्भक्तस्तस्याग्रतस्तद्भक्तमात्मानं दर्शयतः साधोर्वनीपकदोषः ५ । पिण्डार्थं दातृगृहे औषधादिना वमनादिना वा प्रतिकुर्वतो वैद्यादि सूचयतो वा चिकित्सादोषः ६ । बलविद्याराजवर्णकतपः-शक्तिप्रभावादिकोपभयाद्यं लभते स कोपपिण्डः ७ । प्रशंसितोऽपमानितो वा दातुरभिमानोत्पादनेन यल्लभते स मानपिण्डः ८ । एकगृहाद्गृहीत्वा रूपान्तरं कृत्वा मायावशाद्यत्पुनर्ग्रहणार्थं प्रविशति स मायापिण्डः ९ । कस्यापि वस्तुनो गृद्ध्या बहुतरमटतो लोभपिण्डः १० । जननीजनकश्वश्रूश्वशुरादिसंबन्धपरिचयरूपं कुर्वतः पूर्वं पश्चाद्वा दानाद्दातारं वर्णयतो वा संस्तवदोषः ११ । स्त्रीरूपदेवताधिष्ठितं पूर्वसेवाऽऽराध्यं[2] च सप्रभाववर्णाम्नायं पिण्डार्थं प्रयुञ्जानस्य विद्यापिण्डः १२ । पुरुषदेवाधिष्ठितं पठितसिद्धं च सप्रभाववर्णाम्नायं प्रयुञ्जानस्य पुनर्मन्त्रपिण्डः १३ । अदृशीकरणहेतुं नयनाञ्जनादिकं कुर्वतश्चूर्णपिण्डः १४ । सौ-

१ ड-पुस्तके-" प्रकाशने " इत्यपि । २ व-पुस्तके-" पूर्वसेवोत्तरसेवाराध्यम् " इत्यपि ॥

षट्॥

भाग्यदौर्भाग्यफलान् पादलेपप्रभृतीन् योगान् पिण्डार्थमेव प्रयुञ्जानस्य योगपिण्डः १५। मङ्गलस्नानमूलिकाद्यौषधिरक्षादिना गर्भकरणविवाहभङ्गादि वशीकरणादि च पिण्डार्थं कुर्वतो मूलकर्म १६॥ इत्युत्पादनादोषाः षोडश ॥ तथाऽभिग्रहचतुष्कं द्रव्य १ क्षेत्र २ काल ३ भावा ४ भिग्रहरूपम्। यदाह—"दव्वओ १ खित्तओ २ चेव, कालओ ३ भावओ ४ तहा। अभिग्गहा उ साहूणं, एवं हुंति चउव्विहा ॥ १ ॥" श्रूयते श्रीमन्महावीरस्य चतुर्धाऽप्यभिग्रहः। यथा—"पृथ्वीनाथसुता भुजिष्यचरिता हंजीरिता[1] मुण्डिता, क्षुत्क्षामा रुदती विधाय पदयोरन्तर्गतां देहलीम्। कुल्माषान् प्रहरद्वयव्यपगमे मे सूर्पकोणेन चेद्, दद्यात्पारणकं तदा भगवतः सोऽयं महाभिग्रहः ॥ १ ॥" इति गाथार्थः ॥ २० ॥

अथ विंशतितमीं षट्त्रिंशिकामाह—

सोलसवयण[16]विहिन्नू, सतरसविहसंजमंमि[17] उज्जुत्तो।
तिविराहणा[3]विरहिओ, छत्तीसगुणो गुरू जयउ ॥ २१ ॥

व्याख्या—गतार्थो। नवरं षोडशधा वचनविधिः कालत्रिकादिकः। यदाह—"कालतियं३ वयणतियं६, लिंगतियं९ तह परुक्खपच्चक्खं। उवणय[2]वणय चउक्कं, अज्झत्थं[3] चेव सोलसमं ॥ १ ॥" कालत्रिकं अतीतादि। यथा—कृतवान् करोति करिष्यति। वचनत्रिकं एकवचनद्विवचनबहुवचनलक्षणम्। लिङ्गत्रिकं स्त्रीपुरुषनपुंसकलक्षणम्। परोक्षं स देवदत्तः। प्रत्यक्षं एष देवदत्तः। 'उवणयवणय' इति उपनीतोपनीतं वचनं चतुर्धा, तत्र उपनीतोपनीतं यथा—अयं

१ "जञ्जीरिता" इत्यपि। २ प्रशंसावचनमुपनत निन्दावचन स्ववनतं द्विकयोगे चत्वारः। ३ अध्यात्ममन्यविवदिषोरपि अन्यवादः सत्वः ॥

ऋद्धिमान् उदारश्च पुमान् १ । उपनीतापनीतं यथा—ऋद्धिमान् परं कृपणः २। अपनीतोपनीतं यथा—अयं दरिद्रोऽप्युदारः ३। अपनीतापनीतं यथा—अयं दरिद्रः कृपणश्च ४ । यद्वा स्त्री सुरूपा सुशीला च१ । सुरूपा कुशीला च २ । कुरूपा सुशीला च३ । कुरूपा कुशीला च४।। 'अज्झत्थं' इति अध्यात्मवचनं यथा—मनोगतं किमप्यवक्तुकामोऽपि सहसा तदेव वक्ति तदध्यात्मवचनमिति । तथा सप्तदशधा संयमः पृथिव्यादियत्नलक्षणः । यदाह—"पुढविदगअगणिमारुअ-वणसइबितिचउपणिंदिअज्जीवे । पेहुप्पेहपमज्जण-परिठवणमणोवए काए ॥ १ ॥" 'परिठवणत्ति' परिष्ठापनासंयमः । शेषाणि पदानि प्रतीतानि । विराधनात्रिकं ज्ञानादिविराधनालक्षणम् । यद्यतिप्रतिक्रमणसूत्रम्—"पडिक्कमामि तिहिं विराहणाहिं, नाणविराहणाए दंसणविराहणाए चरित्तविराहणाए ।" इति गाथार्थः ॥ २१ ॥

अथैकविंशतितमीं षट्त्रिंशिकामाह—

नरदिक्खदोसे अट्ठा-रसेव अट्ठार पावठाणाइं । दूरेण परिहरंतो, छत्तीसगुणो गुरू जयउ ॥२२॥

व्याख्या—कण्ठ्या । नवरं अष्टादश नरदीक्षादोषाः शिशुत्ववृद्धत्वादयः । यदाह—"बाले१ बुड्ढे२ नपुंसे३ य, कीवे४ जडे५ य वाहिए६ । तेणे७ रायावगारी८ य, उम्मत्ते९ य अदंसणे१० ॥१॥ दासे११ दुट्ठे१२ य मूढे१३ य, अणत्ते१४ जुंगिए१५ इय । उवट्ठिए १६ य भइए १७, सेहनिप्फेडिया १८ इय ॥२॥" तत्र सप्ताष्टौ वर्षाणि यावद्बालोऽभिधीयते १ । सप्ततिवर्षेभ्य ऊर्द्ध्वं वृद्धः २ । नपुंसकस्तृतीयवेदीयः ३ । स्त्रीभोगैर्निमन्त्रितोऽसंवृताया वा स्त्रियोऽङ्गोपाङ्गानि दृष्ट्वा शब्दं वा मन्मनोल्लापादिकं तासां श्रुत्वा समुद्भूतकामाभिलाषोऽधिसोढुं न शक्नोति स क्लीबः ४ । जडस्त्रिविधः, भाषया १ शरी-

१ व्यापारः । २ उपेक्षा ॥

रेण २ करणेन ३ च । भाषाजडः पुनरपि त्रिधा—जलमूकः १, मन्मनमूकः २, एलमूकः ३ । तत्र जलमग्न इव बुडबुडायमानो यो वक्ति स जलमूकः १ । यस्य तु ब्रुवतः खञ्च्यमानमिव वचनं स्खलति स मन्मनमूकः २ । यस्त्वेलक इवाव्यक्तमूकतया शद्बमात्रमेव करोति स एलमूकः ३ ॥ मन्मनमूको मेधाविगुणादीक्षणीयो नेतरौ १ । यः पथि भिक्षाटने वन्दनादिषु वाऽतीवस्थूलतया शक्तो न भवति स शरीरजडः २ । करणं–क्रिया तस्यां जडः समितिगुप्तिप्रत्युपेक्षणासंयमपालनादिक्रियायां पुनः पुनरुपदिश्यमानोऽप्यतीव जडतया यो गृहीतुं न शक्नोति स करणजडः ३ । ५ । व्याधितो भगन्दरातीसारप्रभृतिरोगैर्ग्रस्तः ६ । स्तेनश्चौरः ७ । श्रीगृहान्तःपुरनृपतिशरीरतत्पुत्रादिद्रोहको राजापकारी ८ । उन्मत्तो भूतादिगृहीतः ९ । अदर्शनः काणोऽन्धः स्त्यानर्द्धिको वा १० । 'दासत्ति' दासोऽङ्कितो दासीजातो वा ११ । 'दुट्ठत्ति' दुष्टो द्विधा, कपायदुष्टो १ विपयदुष्टश्च २ । यदाह—"दुविहो य होइ दुट्ठो, कसायदुट्ठो १ य विसयदुट्ठो २ य । सासंवपुत्तीओलगित्थिसिहरणी पढम आहरणा ॥ ११ ॥" तत्र सर्षपभर्जिकाभिनिविष्टसाध्वादिवदुत्कटकषायः कपायदुष्टः १ । अतीव परयोषिदादिषु गृद्धो विपयदुष्टोऽपि द्विधा, स्वपरपक्षाभ्यां चतुर्भङ्गी । विपयदुष्टस्त्रिधा, स्वलिङ्गगृहिलिङ्गान्यलिङ्गभेदात् । संजेइकप्पठिए वा, सिज्जायरि अन्नउत्थिणीए वा । एसो उ विसयदुट्ठो, दुविहोऽवि न अरिहए दिक्खं ॥ १ ॥" १२ । 'मूढत्ति' मूढो मूर्खो व्यामूढो वा १३ । 'अणत्तेत्ति' ऋणार्तः १४ । 'जुंगिएत्ति' जातिकर्मशरीरादिभिर्दूषितो जुङ्गितः, तत्र मातङ्गकोलिकवरडसूचिकादयोऽस्पृश्या जातिजुङ्गिताः, स्पृश्या अपि स्त्रीमयूरकुर्कुटादिपोषका वंशवरत्रारोहणनखप्रक्षालनशौकरिकत्वादिनीचकर्मकारिणः कर्मजुङ्गिताः, करचरणकर्णादिवर्जिताः शरीरजुङ्गिताः १५ । 'उवट्ठिएत्ति' उपस्थितो भोगलाहिकः १६ ।

१ सर्षपभर्जिकार्थमाचार्यस्य परासोरपि दन्तभञ्जक. अवलगिका स्त्री शीखरिणी च । २ संयतो कल्पस्थिताया साध्व्यां यद्वा सयत्या बालिकाया वा ॥

'भइएत्ति' भृतको वृत्तिकिङ्करः १७। 'सेहनिप्फेडिआइयात्ति' यो हि अनुज्ञां विनाऽपहृत्य दीक्ष्यते स शिष्यानिःस्फेटिकः १८। एष तृतीयव्रतविलोपनप्रसङ्गान्न दीक्षणीयो निरतिशयैरिति। अष्टादश पापस्थानानि प्राणातिपातादीनि। यदाह—"पाणाइवाय १ मलियं २, चोरिक्कं ३ मेहुणं ४ दविणमुच्छं ५। कोहं ६ माणं ७ मायं ८, लोभं ९ पिज्जं १० तहा दोसं ११॥१॥ कलहं १२ अब्भक्खाणं १३, पेसुन्नं १४ रइअरइसमाउत्तं १५ परपरिवायं १६ मायामोसं १७ मिच्छत्तसल्लं १८ च॥२॥" अपि च—"सुहुमे य वायरे वा, जो पाणे उवहिंसइ। रागदोसाभिभूयप्पा, लिप्पई पावकम्मुणा॥१॥ जो मुसं भासए किंचि, अप्पं वा जइ वा वहुं। रागदोसाभिभूयप्पा, लिप्पई पावकम्मुणा॥२॥ अदत्तं गिण्हई जो उ, अप्पं वा जइ वा वहुं। रागदोसाभिभूयप्पा, लिप्पई पावकम्मुणा॥३॥ मेहुणं सेवई जो उ, तिरिच्छं दिव्वमाणुसं। रागदोसाभिभूयप्पा, लिप्पई पावकम्मुणा॥४॥ परिग्गहं गिण्हई जो उ, अप्पं वा जइ वा वहुं। गेही मुच्छाभिभूअप्पा, लिप्पई पावकम्मुणा॥५॥ कोहं जो अ उईरेइ, अप्पणो य परस्स य। तन्निमित्ताणुवंधेणं, लिप्पई पावकम्मुणा॥६॥ माणं जो उ उईरेइ, अप्पणो य परस्स य। तन्निमित्ताणुवंधेणं, लिप्पई पावकम्मुणा॥७॥ मायं जो उ उईरेइ, अप्पणो य परस्स य। तन्निमित्ताणुवंधेणं, लिप्पई पावकम्मुणा॥८॥ लोभं जो उ उईरेइ, अप्पणो य परस्स य। तन्निमित्ताणुवंधेणं, लिप्पई पावकम्मुणा॥९॥ रागं जो उ उईरेइ, अप्पणो य परस्स य। तन्निमित्ताणुवंधेणं, लिप्पई पावकम्मुणा॥१०॥ दोसं जो उ उईरेइ, अप्पणो य परस्स य। तन्निमित्ताणुवंधेणं, लिप्पई पावकम्मुणा॥११॥ कलहं जो उईरेइ, अप्पणो य परस्स य। तन्निमित्ताणुवंधेणं, लिप्पई पावकम्मुणा॥१२॥ अभक्खाणं उईरेइ, अप्पणो य परस्स य। तन्निमित्ताणुवंधेणं, लिप्पई पावकम्मुणा॥१३॥ पेसुन्नं जो उईरेइ, अप्पणो य परस्स य। तन्निमित्ताणुवंधेणं, लिप्पई पावकम्मुणा॥१४॥ रइअरइं उ-

उईरेइ, अप्पणो य परस्स य । तन्निमित्ताणुबंधेणं, लिप्पई पावकम्मुणा ॥ १५ ॥ परपरिवायमुईरेइ, अप्पणो य परस्स य । तन्निमित्ताणुबंधेणं, लिप्पई पावकम्मुणा ॥ १६ ॥ मायामोसं उईरेइ, अप्पणो य परस्स य । तन्निमित्ताणुबंधेणं, लिप्पई पावकम्मुणा ॥ १७ ॥ मिच्छासल्लं उईरेइ, अप्पणो य परस्स य । तन्निमित्ताणुबंधेणं, लिप्पई पावकम्मुणा ॥ १८ ॥" इति गाथार्थः ॥ २२ ॥

अथ द्वाविंशतितमीं षट्त्रिंशिकामाह—

सीलंगसहस्साणं, धारंतो तह य बंभभेयाणं । अट्ठारसगमुयारं, छत्तीसगुणो गुरू जयउ ॥ २३ ॥

व्याख्या—सुगमैव । नवरं अष्टादशसहस्रशीलाङ्गानामियं निष्पत्तिः । यथा—"करणे जोए सन्ना, इंदिय भोमाइ समणधम्मे य । सीलंगसहस्साणं, अट्ठारसगस्स निप्फत्ती ॥ १ ॥" ब्रह्माष्टादशधा दिव्यौदारिकादिभेदभिन्नम् । यदाह—"दिव्यौदारिककामानां, कृतानुमतिकारितैः । मनोवाक्कायतस्त्यागो, ब्रह्माष्टादशधा मतम् ॥ १ ॥" इति गाथार्थः ॥ २३ ॥

अथ त्रयोविंशतितमीं षट्त्रिंशिकामाह—

उस्सग्गदोसगुणवी-सवज्जओ सतरभेयमरणविहिं ।
भवियजणे पयडंतो, छत्तीसगुणो गुरू जयउ ॥ २४ ॥

---

१ ब-पुस्तके—"जे नो करंति मणसा, निज्जियआहारसन्नासोइंदि । पुढवीकायारंभं, खंतिजुआ ते मुणी वंदे ॥ १ ॥ इत्यादिकरणगाथा ग्रंथान्तरादवसेयाः । मयाष्टा—" इत्यपि पाठः ॥

व्याख्या—सुबोधैव। नवरं उत्सर्गदोषाणामेकोनविंशतेर्वर्जको गुरुरिति। ते च घोटकादयो दोषाः। यदाह—" घोडग १ लय २ खंभाई ३, मालु ४ द्धी ५ सवरि ६ नियल ७ खलिण ८ वहू ९। लंबुत्तर १०, थणसंजई ११, भमुहं १२ गुलि १३ वायस १४ कविट्ठे १५ ॥ १ ॥ सिरकंप १६ मूय १७ वारुणि १८, पेहत्ति १९ चइज्ज दोस उस्सग्गे। लंबुत्तरवहुयाई, तिय चउ नो समणिसड्ढीणं ॥ २ ॥ एतद्गमनिका—अश्ववद्विषमपादः कायोत्सर्गं करोतीति सर्वत्र योज्यम् १। वाताहतलतावत्कम्पमानः २। स्तम्भे कुड्यादौ वाऽवष्टभ्य ३। माले शिरोऽवष्टभ्य ४। शकटोर्द्धिवदङ्गुष्ठौ पार्ष्णी वा मेलयित्वा ५। विवसनशवरीवद्गुह्याग्रे करौ कृत्वा ६। निगडितवच्चरणौ पृथुलौ संकीर्णौ वा विधाय ७। कविकवद्रजोरहणं गृहीत्वा ८। वधूवदवनतोत्तमाङ्गः ९। जान्वधः प्रलम्बमाननिवसनः १०। दंशादिरक्षार्थं अज्ञानाद्वा हृदयं प्रच्छाद्य संयतीवत्प्रावृत्य ११। आलापकगणनार्थमङ्गुलीभ्रुवौ वा चालयन् १२। वायसवच्चक्षुर्गोलकौ भ्रा(भ्र)मयन् १३। कपित्थवत्परिधानं पिण्डयित्वा १४। यक्षाविष्ट इव शिरः कम्पयन् १५। मूकवत् हूहूकुर्वन् १६। वारुणी सुरा, तद्वद्बुडबुडायमानः १७। अनुप्रेक्ष्य(क्ष)माणो वानर इवौष्ठपुटौ चालयंश्च १८। कायोत्सर्गं करोतीत्येकोनविंशतिर्दोषाः। तथा सप्तदशभेदं मरणमावीचिमरणादिकम्। यदाह—" आवीइ १ ओहि २ अंतिय ३, वलायमरणं ४ वसट्टमरणं ५ च। अंतोसल्लं ६ तब्भव ७, वालं ८ तह पंडियं ९ मीसं १० ॥ १ ॥ छउमत्थ ११ मरणकेवलि १२, विहाणसं १३ गिद्धपिट्ठमरणं १४ च। मरणं भत्तपरिण्णा १५, इंगिणि १६ पाओवगमणं १७ च ॥ २ ॥ " एतद्विवरणश्लोकाश्चात्र[1]—" मरणं सप्तदशधा—ऽऽवीचिमरणमादिमम्। जीवानां प्रतिसमया—युःकर्मदलिकत्रुटिः ॥ १ ॥ यान्यायुःकर्मदलिका—न्यनुभूय मृतः सकृत्। मर्ताऽनुभूय तान्येवा—

१ ढ–पुस्तके–" एतद्विवरण चात्र " इत्यपि ॥

वधिमृत्युरयं स्मृतः ॥ २ ॥ नानुभूय च मर्ता च, तदन्तिकमितीरितम् ३ । संयमयोगसभ्रस्य, बलाकामरणं भवेत् ४ ॥ ३ ॥ इन्द्रियार्थवशार्तस्य, वशार्तमरणं भवेत् ५ । सशल्यमरणं प्राय–श्चित्तहीनस्य देहिनः ६ ॥ ४ ॥ मुक्त्वा संख्यायुषस्तिर्यग्–नरान् देवांश्च नारकान् । केषांचिदपि शेषाणां, स्यान्मृतिस्तद्भवाभिधा ७ ॥ ५ ॥ बालाख्यं स्यादविरते ८, विरते विरताभिधम् ९ । मरणं मिश्रमाख्यातं, विरताविरते पुनः १० ॥ ६ ॥ चतुर्ज्ञानवतां याव–च्छद्मस्थं मरणं स्मृतम् ११ । स्यात् केवलिमरणं तु, केवलज्ञानशालिनाम् १२ ॥ ७ ॥ गृद्ध्रादिभक्षणाद्गार्द्धपृष्ठं मरणमुच्यते १३ । उद्बन्धनादिना मृत्यु–र्भवेद्वैहानसाभिधम् १४ ॥ ८ ॥ मृत्युर्भक्तपरिज्ञाख्यः, सर्वाहारविवर्जनात् । मुक्तानिःशेषसङ्गस्य, जन्तोः सप्रतिकर्मणः १५ ॥ ९ ॥ इङ्गित्या(ता)ख्यं तदेवान्य–त्प्रतिकर्मविवर्जितम् १६ । पादपोपगमाख्यं तु, निश्चलं छिन्नवृक्षवत् १७ ॥ १० ॥ मरणेष्वेषु सर्वेषु, त्रयमन्तिममुत्तमम् । ज्वलनाद्युपघातैस्तत्र कर्तव्यं विवेकिना १८ ॥ ११ ॥ इति गाथार्थः ॥ २४ ॥

अथ चतुर्विंशतितमीं षट्त्रिंशिकामाह—

वीसमसमाहिठाणे, दसेसणा पंच गासदोसे य ।
मिच्छत्तं च चयंतो, छत्तीसगुणो गुरू जयउ ॥ २५ ॥

व्याख्या—विंशतिरसमाधिस्थानानि, दशैषणादोषान्, पञ्च ग्रासैषणादोषान्, मिथ्यात्वं च त्यजन्, इत्येवं षट्त्रिंशद्गुणो गुरुर्जयत्विति संक्षेपार्थः, विस्तरार्थस्त्वयम्—विंशतिरसमाधिस्थानानि द्रुतद्रुतचारादीनि। यदागमः—"दवदवचारि १ पमज्जिय २, दुपमज्जिय ३ रित्तसिज्ज ४ आसणिए ५ । रायणियपरिभासी ६, थेर ७ भूओघाई ८ य ॥ १ ॥

१ ड–पुस्तके–"–वेंहैषानसाभिधम्" इत्यपि ॥

संजलण ९ कोहणे १० पि-ट्ठमंसिए ११ भिक्खभिक्खमोहारी १२ । अहिगरणकरोदीरण १३, अकालसज्झायकारी १४ य ॥ २ ॥ ससरक्खपाणिपाए १५, सद्दकरे १६ कलह १७ झंझकारी १८ य । सूरप्पमाणभोई १९, वीसइमे एसणासमिए २० ॥ ३ ॥ " इत्येतत्पदसंस्कारश्चायम्—द्रुतद्रुतचारी १, अप्रमार्जितस्थायी २, दुष्प्रमार्जितस्थायी ३, घट्टशालादिसेवी ४, अतिरिक्तशयनादिसेवी ५, रत्नाधिकपारिभाषी ६, स्थविरोपघाती ७, भूतोपघाती ८, संजलनोपघाती ९, दीर्घकोपी १०, पराङ्मुखावर्णवादी ११, अभीक्ष्णमभीक्ष्णं चौरस्त्वमित्यादिवादी १२, उपशान्ताधिकरणोदीरकः १३, अकालस्वाध्यायकारी च १४, सरजस्कपाणिपादः १५, रात्रावुच्चैः शब्दकरः १६, कलहकरः १७, गणभेदकारी १८, सूरप्रमाणभोजी १९, एषणायामसमितः २० इति ॥ तथा दशैषणादोषाः शङ्कितादयः। यदाह—"संकीय १ मक्खिय २ निक्खत्त ३ पिहिय ४ साहरिय ५ दायगु ६ म्मीसे ७ । अपरिणय ८ लित्त ९ छड्डिय १०, एसणदोसा दस हवंति ॥ १ ॥" एतद्भमनिका यथा—शुद्धमप्यशुद्धमिति शङ्कितमकल्प्यम् १ । म्रक्षितं सचित्तेन आगमगर्हितेन वा खरण्टितम् २। सचित्तपृथिव्यादिषु स्थापितं निक्षिप्तम् ३ । सचितेन फलादिना छन्नं पिहितम् ४। अयोग्यसचित्तादिपूत्सार्य यद्दीयते तत्संहृतम् ५ । दायकदोषा आभिर्गाथाभिरवसेयाः—" थेरऽपहुपंडवेविरजारियंधव्वत्तमत्तउम्मत्ते । करचरणच्छिन्नपगलिय-नियलंडुपाउयारूढे ॥ १ ॥ खंडइ पीसइ भुंजइ, कत्तइ लोढेइ विक्खिणइ पिंजइ । दलइ विरोलइ जेमइ, जा गुव्विणि वालवच्छा य ॥ २ ॥ तह छकाए गिण्हइ, घट्टइ आरभइ खिवइ दट्ठु जई । साहरण चोरियंगं, देइ परकं परट्ठं वा ॥ ३ ॥ ठवइ वलिं उव्वत्तइ, पिढराइ तहा सपच्चवाया जा । दिंतेसु एवमाइसु, ओहेण मुणी न गिण्हंति ॥ ४ ॥ योग्यमयोग्यं च

१ स्थविरप्रभुपण्डकवेपथुमज्ज्वरितान्धाव्यक्तमत्तोन्मत्ताः । छिन्नकरचरणप्रगलत्कुष्ठनिगडितादितपादुकारूढः ॥ २ अ-पुस्तके—" उव्वत्तइ " इत्यपि ॥

संमील्य यद्दीयते तदुन्मिश्रम् ७। अपरिणतं द्विधाऽप्रासुकीभूतं द्रव्यापरिणतं, दायकादेरशुद्धे भावे भावापरिणतम् ८। दध्यादिलेपकृतसंसृष्टाभ्यां मात्रकराभ्यां सावशेषद्रव्येण च त्रिभिः पदैरष्टभङ्ग्यां विषमभङ्गेषु लिप्तम् ९। यत्र दीयमाने परिसाडिस्तच्छर्दितम् १०। एते एषणादोषा दश। ग्रासैषणादोषाः पञ्च संयोजनाद्याः। यदाह—"संजोअणा१ पमाणे२, इंगाले३ धूम४ कारणे५ तह य।" इति। संयोजनं लौल्यात् क्षीरशर्करादिमीलनम् १। प्रमाणातिरिक्तं षड्भागोनमात्राधिकम् २। इङ्गालं सरागप्रशंसम्३। सधूमकं सद्वेषनिन्दितम् ४। अकारणं वेदनादिषट्कारणरहित५मिति॥ एकविधं मिथ्यात्वं चादेवादिष्वपि देवत्वादिबुद्धिलक्षणम्। यदाह—"अदेवे देवबुद्धिर्या, गुरुधीरगुरौ च या। अधर्मे धर्मबुद्धिश्च, मिथ्यात्वं तद्विपर्ययात्॥ १॥ मिथ्यात्वं परमो रोगो, मिथ्यात्वं परमं तमः। मिथ्यात्वं परमः शत्रु-र्मिथ्यात्वं परमं विषम्॥ २॥ जन्मन्येकत्र दुःखाय, रोगो ध्वान्तं रिपुर्विषम्। अपि जन्मसहस्रेषु, मिथ्यात्वमचिकित्सितम्॥ ३॥" इत्येतान् दोषान् त्यजन् षट्त्रिंशद्गुणो गुरुर्जयतु। इति गाथार्थः॥ २५॥

अथ पञ्चविंशतितमीं षट्त्रिंशिकामाह—

इगवीससबलचाया, सिक्खासीलस्स पनरठाणाणं।
अंगीकरणेण सया, छत्तीसगुणो गुरू जयउ॥ २६॥

व्याख्या—गदितार्थैव। नवरं शबलतास्थानान्येकविंशतिः दगलेपादीनि। यदागमः—"वरिसंतो दस१ मास-स्स तिन्नि दगलेव माइठाणाइं। आउट्टिया करंतो२, वहा३ लिया४ दिन्न५ मेहुन्ने६॥१॥ निसिभत्त७ कम्म८ निवपिं-ड९ कीयमाई अभिक्खसंवरिए १४। कंदाई भुंजंतो १५, उदल्लहत्थाइगहणं च १६॥ २॥ सचित्तसिलाकोले १७, अइरावणिठाण १८ णिद्धस-

सरक्खे १९। छम्मासंतो गणसं–कमं च २० करकम्म २१ मिय सवला ॥ ३ ॥ ” एतद्भमनिका यथा—वर्पान्तर्लेपानां दशकमाकुट्या कुर्वतः साधोः प्रथमं शवलस्थानम् १। मासान्तर्दकलेपत्रयं कुर्वतो द्वितीयम् २। वधं कुर्वतस्तृतीयम् ३। परमत्रानाकुट्येति घटाकोटिमाटीकते। आकुट्टिवधे हि मूलप्रायश्चित्तापत्तिः, शवलता त्वप्राप्तमूलस्येति। यदुच्यते—“ अवराहंमि पयणुए, जेणं मूलं न वच्चए साहू। सवलंति तं चरित्तं, तम्हा सवलत्तणं विंति ॥ १ ॥” तथाऽलीकं अल्पतश्चतुर्थम् ४। अदत्तं गृह्णतः पञ्चमम् ५। मैथुनं सेवमानस्य षष्ठम् ६। निशि भुञ्जानस्य सप्तमम् ७। आधाकर्मिकं भुञ्जानस्याष्टमम् ८। नृपपिण्डं भुञ्जानस्य नवमम् ९। क्रीतं गृह्णतो दशमम् १०। आदिशब्दात्संप्रदायाच्च प्रामित्यं गृण्हत एकादशमम् ११। अभ्याहृतं गृह्णतो द्वादशमम् १२। अच्छिद्य गृह्णतस्त्रयोदशमम् १३। अभीक्ष्णमसंवरस्याप्रत्याख्यानवतश्चतुर्दशम् १४। कन्दादि भुञ्जानस्य पञ्चदशम् १५। उदकार्द्रहस्ताद्गृह्णतः पोडशम् १६। सचित्तशिलाकोलस्थायिनः सप्तदशं, तत्र शिला सच्चित्तपृथिवीकायमयी, कोलो घुणस्तद्युक्तं काष्ठादिकमपि कोलमिति १७। तथाऽनन्तरितावनिस्थाने निपीदतोऽष्टादशम् १८। स्निग्धसरजस्कशरीरस्य भुञ्जानस्यैकोनविंशतितमम् १९। पण्मासान्तर्गणाद्गणान्तरसंक्रमणं कुर्वतो विंशतितमम् २०। करकर्मानङ्गक्रीडादिककामोपक्रमं कुर्वत एकविंशतितमम् २१। शवलतास्थानमिति। एतेपां परित्यागेन परिहारेणेत्यर्थः। तथा शिक्षाशीलस्य पञ्चदशस्थानानामङ्गीकरणेन, तानि च नीचैर्वृत्त्यादीनि। यदार्षम्—“ अह पन्नरठाणेहिं, सिक्खासीलुत्ति वुच्चइ। नीयावित्ती १ अचवले २, अमाई ३ अकुतूहले ४ ॥ १ ॥ अप्पं चाहिक्खिवई ५, पवंधं च न कुव्वई ६। मित्तिज्जमाणो भयई ७, सुअं लद्धुं न मज्जई ८ ॥ २ ॥ न य पावपरिक्खेवी ९,

१ ड–पुस्तके–“ पनरस– ” इत्यपि ॥

न य मित्तेसु कुप्पइ १० । अप्पियस्सावि मित्तस्स, रहे कल्लाणभासई ११ ॥ ३॥ कलहडमरवज्जए १२, बुद्धे अभिजाइए १३। हरिमं १४ पडिसंलीणे १५, सुविणीउत्ति वुच्चइ ॥ ४ ॥ वसे गुरुकुले निच्चं, जोगवं उवहाणवं । पियंकरे पियंवाई, से सिक्खं-लद्धुमरिहइ ॥ ५ ॥" इति गाथार्थः ॥ २६ ॥

अथ षड्विंशतितमीं षट्त्रिंशिकामाह—

बावीसपरीसहहियासणेण चाएण चउदसण्हं च। अब्भिंतरगंथाणं, छत्तीसगुणो गुरू जयउ ॥२७॥

व्याख्या—उत्तानार्थैव । नवरं द्वाविंशतिपरीषहाः क्षुत्पिपासादयः । यदागमः—"खुहा१ पिवासा२ सी३ उण्हं४ दंसा५ऽचेला६ रइत्थिओ८ । चरिया९ निसीहिया१० सिज्जा११, अक्कोस१२ वह१३ जायणा१४ ॥१॥ अलाभ१५ रोग१६ तणप्फासा१७, मल१८ सक्कार१९ परीसहा। पन्ना२० अन्नाण२१ सम्मत्तं२२, इअ बावीस परीसहा ॥२॥" तथा—"पन्नाऽनाणपरीसह, नाणावरणंमि हुंति दो चेव । इक्को अ अंतराए, अलाभपरीसहो चेव ॥ १ ॥ अरई अचेल इत्थी, निसीहिया जायणा य अक्कोसा। सक्कारपुरक्कारे, चरित्तमोहंमि सत्तेव ॥ ४ ॥ दंसणमोहे दंसण-परीसहो नियमसो हवइ इक्को । सेसा परीसहा खलु, इक्कारस वेयणिज्जंमि ॥ ३ ॥ बावीसं बायरसं-पराइ चउदस य सुहुमरागंमि । छउमत्थवीयरागे, चउदस इक्कारस जिणंमि ॥ ९ ॥ वीसं उक्कोसपए, वट्टंति जहण्णओ य इक्कं च । सीओसिणचरियनिसी-हिया य जुगवं न वट्टंति ॥ ५ ॥" अभ्यन्तरग्रन्थचतुर्दशकं रागद्वेषादिकम् । यदाह—"रागो दोसो अ मिच्छत्तं, कसाया हासछक्कगं । एगो वेउत्तिमे गंथा, अंतरंगा चउद्दस ॥ १ ॥" इति गाथार्थः ॥ २७ ॥

अथ सप्तविंशतितमीं षट्त्रिंशिकामाह—

पणवेइयाविसुद्धं, छद्दोसविमुक्क पंचवीसविहं । पडिलेहणं कुणंतो, छत्तीसगुणो गुरू जयउ ॥२८॥

व्याख्या—पञ्चविधवेदिकाविशुद्धं षड्दोषविप्रमुक्तं पञ्चविंशतिविधां प्रतिलेखनां कुर्वन्, इति षट्त्रिंशद्गुणो गुरुर्जयत्विति संक्षेपार्थः । विस्तरार्थस्त्वयम्—पञ्चविधवेदिकादोषाः प्रसारितपादादयः । यदाह—“ पसरियपय १ जाणुवरिं २, अंतोलग्गंति ३ गेगभुअवाहिं ५ । इअ वेइयपणगेणं, सुद्धं पडिलेहणं कुज्जा ॥ १ ॥ ” षड्दोषा आरभटादयः । यदाह—“ आरभडा १ संमद्दा २, मोसलि ३ पप्फोडणा ४ य वक्खित्ता ५ । नच्चाविय ६ त्ति पडिले-हणाए वज्जिज्ज छद्दोसे ॥ १ ॥ वितहकरणेण तुरियं, अन्नन्नागिन्हणे व आरभडा । अंतो व हुज्ज कोणा, निसियण तत्थेव संमद्दा ॥ २ ॥ अह उड्ढतिरिय-भूमा-लभित्तिसंघट्टणा भवे मुसली । पप्फोडण वत्थस्स य, गाढं रयगुंडियस्सेव ॥ ३ ॥ वक्खित्ता सुत्ताइसु, विमग्गणेणं च जा कया होइ । वत्थे अप्पाणम्मि उ, चउहा नच्चाविआ होइ ॥ ४ ॥ ” प्रतिलेखनायाः, पञ्चविंशतिभेदास्तु दृष्टिप्रतिलेखनाद्याः । यदाह—“ दिट्ठिपडिलेह एगा, छ उड्ढपक्खोड तिगतिगंतिरिया । अक्खोडपमज्जणया, नव नव पणवीस पडिलेहा ॥ १ ॥ ” इति गाथार्थः ॥ २८ ॥

अथाष्टाविंशतितमीं षट्त्रिंशिकामाह—

सत्तावीसविहेहिं, अणगारगुणेहिं भूसियसरीरो । नवकोडिसुद्धगाही, छत्तीसगुणो गुरू जयउ ॥ २९ ॥

व्याख्या—कण्ठ्या । नवरं अनगारगुणा व्रतषट्केन्द्रियनिग्रहादिकाः । यदाह—“ वयछक्कमिंदियाणं, (वि)निग्गहो भावकरणसच्चं च । खमयाविरागयावि य, मणमाईणं निरोहो अ ॥ १ ॥ कायाण छक्कजोग-म्मि जुत्तया वेयणाहियास-

णया । तह मारणंतिअहिया-सणा य एएऽणगारगुणा ॥ २ ॥ " नवकोटिविशुद्धं त्वनाहतादिकम् । यदाह—" न हणइ न हणावेइ, हणंतं नाणुजाणइ । न पयइ न पयावेइ, पयंतं नाणुजाणइ ॥ १ ॥ न किणइ न किणावेइ; किणंतं नाणुजाणइ । जो भिक्खू तस्स तं होइ, नवकोडिविसुद्धयं ॥ २ ॥ " इति गाथार्थः ॥ २९ ॥

अथैकोनत्रिंशत्तमीं षट्त्रिंशिकामाह—

अडवीसलद्धिपयडण-पउणो लोए तहा पयासंतो ।

अडविहपभावगत्तं, छत्तीसगुणो गुरू जयउ ॥ ३० ॥

व्याख्या—सुबोधैव । नवरं अष्टाविंशतिलब्धय आमर्षौषध्यादयः । यदाह—"आमोसहि १ विप्पोसहि २, खेलोसहि ३ जल्लमोसही चेव ४ । सव्वोसहि ५ संभिन्ने ६, ओहि ७ रिउ ८ विउलमइलद्धी ९ ॥ १ ॥ चारण १० आसीविस ११ के-वली य १२ गणहारिणो १३ य पुव्वधरा १४ । अरिहंत १५ चक्कवट्टी १६, वलदेवा १७ वासुदेवा य १८ ॥ २ ॥ खीरमहुसप्पिआसव १९, कुट्ठयबुद्धी २० पयाणुसारी य २१ । तह बीअबुद्धि २२ तेअग २३, आहारग २४ सीयलेसा य २५ ॥ ३ ॥ वेउव्वियदेहलद्धी २६, अक्खीणमहाणसी २७ पुलागा य २८ । परिणामतववसेणं, एयाओ हुंति लद्धीओ ॥ ४ ॥" एतद्विवरणगाथाश्चेमाः—" संफरिसणमामोसो, मुत्तपुरीसाण विप्पुसो वावि । अन्ने विडित्ति विट्ठं, भासंति पइत्ति पासवणं ॥ १ ॥ एए अन्नेवि बहू, जेसिं सव्वेवि सुरहिणोऽवयवा । रोगोवसमसमत्था, ते हुंति तहोसहिं पत्ता ॥ २ ॥ जो सुणइ सव्वओ सुण-इ सव्वविसए य सव्वसोएहिं । सुणइ बहुए व सद्दे, भिन्ने संभिन्नसोओ सो ॥ ३ ॥ रिउ सामन्नं तम्मत्तगाहिणी रिउमई मणोनाणं । पायं विसेसविमुहं, घडमित्तं चिंतियं मुणइ ॥ ४ ॥ विउलं वत्थुविसेसं, नाणं तग्गाहिणी मई

विउला । चिंतियमणुसरइ घडं, पसंगओ पज्जवसएहिं ॥५॥ अइसयचरणसमत्था, जंघाविज्जाहिँ चारणा मुणओ । जंघाइ जाइ पढमो, निस्सं काउं रविकरेवि ॥ ६ ॥ एगुप्पाएण गओ, रुअगवरम्मी तओ पडिनियत्तो । वीएणं नंदीसरमेइ इहं तइयएण पुणो ॥ ७ ॥ ऊर्ध्वम्—पढमेण पंडगवणं, वीउप्पाएण नंदणं एइ । तइउप्पाएण तओ, इह जंघाचारणो एइ ॥८॥ पढमेण माणुसोत्तर-नगंमि नंदीसरं तु वीएणं । एइ तओ तइएणं, कयचेइयवंदणो इहयं ॥ ९ ॥ पढमेण नंदणवणं, वीउप्पाएण पंडगवणंमि । एइ इहं तइएणं, जो विज्जाचारणो होइ ॥ १० ॥ आसीविसा उ दुविहा, जाइकम्मेहिँ तत्थ पढमिल्ला । सप्पाई वीया पुण, मुणिणो खलु निग्गहसमत्था ॥ ११ ॥ केवलिगणपुव्वधरा—ऽरिहंतवलवासुदेवचक्किति । सत्त महालद्धीओ, पाएणं सुप्पसिद्धाओ ॥ १२ ॥ खीरमहुसप्पिसा ओ—वमाणवयणा तयासवा हुंति । कुट्ठयधन्नसुनिचल—सुत्तत्था कुट्ठबुद्धी य ॥ १३ ॥ जो सुत्तपएण वहुं, सुअमणुधावइ पयाणुसारी सो । जो अत्थपएणऽत्थं, अणुसरइ स वीयबुद्धीओ ॥ १४ ॥ चत्तारि अ वाराओ, चउदसपुव्वी करेइ आहारं । संसारंमि वसंतो, एगभवे दुन्नि वाराओ ॥ १५ ॥ समओ जहण्णमंतर, उक्कोसेणं तु जाव छम्मासा । आहारसरीराणं, उक्कोसेणं नवसहस्सा ॥ १६ ॥ तित्थयररिद्धिदंसण, सुहुमपयत्थोवगाहहेउं वा । संसयवुच्छेअत्थं, गमणं जिणपायमूलंमि ॥ १७ ॥ समणिं अवगअवेअं, परिहारपुलायमप्पमत्तं च । चउदसपुव्विं आहा—रगं च न कयाइ संहरइ ॥ १८ ॥ वेउव्वियलद्धीए, अणु व्व सुहुमा खणेण जायंति । कंचणगिरि व्व गुरुणो, लहुदेहा अक्कतूलं व ॥ १९ ॥ पडओ पडकोडीओ, पकुणंति घडाओ घडसहस्सा उ । चिंतिअमित्तं रूवं, खणेण विरयंति किं बहुणा ? ॥ २० ॥ अंतमुहुत्तं नरए, मुहुत्त चत्तारि तिरियमणुएसु । देवेसु अद्धमासो, उक्कोस विउव्वणाकालो

१ " समण अवगयवेयं " इति सिद्धप्राभृते ।

॥ २१ ॥ अक्खीणमहाणसिया, भिक्खं जेणाणियं पुणो तेणं । परिभुत्तं चिय खिज्जइ, बहुएहिवि न उण अन्नेहिं ॥ २२ ॥" अक्षीणमहालयाऽप्येतदन्तर्गतैव । " संघाइयाण कज्जे, चुण्णिज्जा चक्कवट्टिमवि जीए। तीए लद्धीइ जुओ, लद्धिपुलाओ मुणेयव्वो ॥ २३ ॥ भवसिद्धियपुरिसाणं, एयाओ हुंति सयललद्धीओ । भवसिद्धियमहिलाणं, जित्तिय जायंति तं वुच्छं ॥२४॥ अरिहंतचक्किकेसव–बलसंभिन्ने य चारणा पुव्वा । गणहरपुलायआहा–रगं च न हु भवियमहिलाणं ॥ २५ ॥ अभावियपुरिसाणं पुण, दसपुव्विल्लाउ केवलित्तं च । उज्जुमई विउलमई, तेरस एयाओ न हवंति ॥ २६ ॥ अभवियमहिलाणं पुण, एयाओ न हुंति भणियलद्धीओ । महुखीरासवलद्धी, वि नेव सेसाउ अविरुद्धा ॥ २७ ॥ " तथाऽष्टविधप्रभावकता प्रावचनिकादिभिर्गुणैः । यदाह—" पावयणी १ धम्मकही २, वाई ३ नेमित्तिओ ४ तवस्सी य ५ । विज्जा ६ सिद्धो ७ अ कई ८, अट्ठेव पभावगा भणिया ॥ १ ॥ कालुच्चियसुत्तधरो, पावयणी तित्थवाहगो सूरी । पडिबोहियभव्वजणो, धम्मकही कहणलद्धिल्लो ॥ २ ॥ वाई पमाणकुसलो, रायदुवारेऽवि लद्धमाहप्पो । नेमित्तिओ निमित्तं, कज्जंमि पउंजए निउणं ॥ ३ ॥ जिणमयमुब्भासंतो, विगिट्ठखवणेहिँ भुंजइ तवस्सी । सिद्धबहुविज्जमंतो, विज्जावंतो य उचियण्णू ॥ ४ ॥ संघाइकज्जसाहग–चुण्णंजणजोगसिद्धओ सिद्धो । भूयत्थसत्थगंथी, जिणसासणजाणओ सुकवी ॥ ५ ॥ अज्ज(ज)रक्ख १ नंदिसेणो २, सिरिगुत्तविणेय ३ भद्दबाहु य ४ । खवग ५ ज्जखवड ६ समिया ७, दिवायरो ८ वाईयाहरणा[2] ॥ ६ ॥ अमीषां[3] चरित्राणि कथानकेभ्योऽवसेयानि । इति गाथार्थः ॥ ३० ॥

अथ त्रिंशत्तमीं षट्त्रिंशिकामाह—

१ " चक्कवट्टिसेण.वि " इत्यपि ॥ २ ब–पुस्तके–" वा इयाहरणा " इत्यपि । ३ ड–पुस्तके–" अमीषां चरित्राणि दर्शनसप्ततिकाटीकातो ज्ञेयानि " इत्यपि पाठः ॥

एगूणतीसभेए, पावसुए दूरओ विवज्जंतो। सगविहसोहिगुणण्णू, छत्तीसगुणो गुरू जयउ॥ ३१॥

व्याख्या—सुगमैव। नवरं एकोनत्रिंशत् पापश्रुतभेदा अष्टनिमित्ताङ्गाद्याः। यदाह—"अट्ठनिमित्तंगाइं, दिव्वुप्पायं-तलिक्खभोमं च। अंगं सरलक्खण वं-जणं च तिविहं पुणिकिक्कं॥ १॥ सुत्तं वित्ती तह व-त्तियं च पावसुअमउणतीसविहं। गंधव्वनट्टवत्थू-माउं धणुवेयसंजुत्तं॥ २॥" सप्त शोधिगुणास्तु लघुताह्लादजनकत्वादयः। यदागमः—"लहुया १ ऽऽल्हाईजणणं २, अप्पपरनियत्ति ३ अज्जवंसोही ४। दुक्करकरणं ५ विणओ ६, निस्सल्लत्तं च सोहिगुणा ७॥ १॥ वियडंतस्स उ दोसे, असंकिलिट्ठस्स सुद्धचित्तस्स। सो परिहायइ बहुसो, पुव्वज्जियकम्मपब्भारो॥ २॥ जह जह सुद्धसहावो, दोसे विअडेइ सम्मसुवउत्तो। तह तह पल्हाइ मुणी, नवनवसंवेगसद्धाए॥ ३॥ न कुणइ पुणोऽवराहे, पच्छित्तभया निय-त्तिओ अप्पा। तं दट्ठुं अकुणंतो, पावाओ नियत्तिया अन्ने॥ ४॥ सोही उज्जुयभूयस्स, धम्मो सुद्धस्स चिट्ठइ। निव्वाणं परमं जाइ, घयसित्तु व्व पावए॥ ५॥ लज्जा अभिमाणाई, महाबलेऽणेगभवसदब्भत्था। वियडंति जे अगणिउं, ते दुक्कर-कारगा भणिया॥ ६॥ तित्थयराणापालण, गुरुजणविणओ पसेविओ होइ। आलोअणापयाणे, सम्मं नाणाइविणओऽवि॥ ७॥ जं जायइ निस्सल्लो, नियमा आलोइउं कुणइ सत्थो। नो अन्नहत्ति तम्हा, निस्सल्लत्तं गुणो तीए॥ ८॥" इति गाथार्थः॥ ३१॥

अथैकत्रिंशत्तमीं षट्त्रिंशिकामाह—

महमोहबंधठाणे, तीसं तह अंतराँरिछक्कं च। लोए निवारयंतो, छत्तीसगुणो गुरू जयउ॥ ३२॥

व्याख्या—स्फुटार्थैव। नवरं त्रिंशन्महामोहवन्धस्थानानि अतिसंक्लिष्टपरिणामेन जन्तुघातकत्वादीनि। यदागमः—"वा-
रिमज्झेऽवगाहित्ता, तसे पाणेवि हिंसइ १। छाएइ मुहं हत्थेणं, अंतोनायं गलेरवं २॥१॥ सीसावेढेण वेढित्ता, संकिलेसेण मारइ ३।
सीसम्मि जे य आहंतु, दुहमारेण हिंसइ ४॥ २॥ वहुजणस्स नेयारं, दीवं नाणं च पाणिणं ५। साहारणे गिलाणंमि, पहुकिच्चं न कु-
व्वइ ६॥३॥ साहूण धम्मकम्माओ, जो भंसेइ उवट्ठियं ७। नेयाउयस्स मगस्स, अवगारंमि वट्टइ ८॥४॥ जिणाणं णंतनाणीणं, अवण्णं
जे पभासइ ९। आयरिय उवज्झाए, खिंसई मंदबुद्धिए १०॥५॥ तेसिंमेव य नाणीणं, सम्मं नो पडितप्पइ ११। पुणो पुणो आहिगरणं,
उप्पाए तित्थ भेयए १२॥ ६॥ जाणं आंहम्मिए जोए, पउंजइ पुणो पुणो १३। कामे वमित्ता पत्थेइ, इहंमि भविए इय १४॥७॥ अ-
भिक्खणं अवहुस्सुत्तं, जे भासंति वहुस्सुए १५। तह य अतवस्सी य, जे तवास्सित्तिऽहं वए १६॥८॥ जायतेएण वहुजणं, अन्तोधू-
मेण हिंसई १७। अकिच्चमप्पणा काउं, कयमेएण भासइ १८॥९॥ नियडुवहिपाणिहीए[1], पलिउंचे[2] साइजोगजुत्ते[3] य १९। वेइ सव्वं
मुसं वयसि, अज्झीणं झंज्झए[4] सया २०॥१०॥ अद्धाणंमि पवेसित्ता, जो धणं हरइ पाणिणं २१। वीसंभित्तो[5] उवाएणं,
दारे तस्सेव लुप्पइ[6] २२॥ ११॥ अभिक्खमकुमारेउ, कुमारेऽहं च भासए २३। एवमवंभयारीउ, वंभयारित्तिऽहं वए २४
॥ १२॥ जेणेवेसरियं नीए, वित्ते तस्सेव लुब्भइ २५। तप्पभावुट्ठिए वावि, अंतरायं करेइ से २६॥ १३॥ सेणावइं पस-
त्थारं, भत्तारं च विहिंसइ २७। इट्ठस्स वावि निगमस्स, नायगं सिट्ठिमेव वा २८॥ १४॥ अपस्समाणे पस्सामि, अहं दे-
वत्ति वा वए २९। अवण्णेणं च देवाणं, महामोहं पकुव्वइ ३०॥१५॥" अन्तरङ्गारिषट्कं तु अयुक्ततामयुक्तं कामादिकम्।

पद्-
६॥

१ मायाविशेषा एते। २ अपलपन्नालोचयति। ३ उत्तमे वस्तुन्यधमस्य योजनं सातियोग। ४ अविच्छेदेन छिन्नाति सदा। ५ विस्रम्भ्य। ६ ड-पुस्तके—"लुप्पाति"॥

यदाह—"कामो१ कोहो२ लोहो३, हरिसो४ माणो५ मओ६ य इअरूवं । दुरियारिछकमंतर-मेलद्धपसरं सया कुज्जा ॥ १ ॥" इति गाथार्थः ॥ ३२ ॥

अथ द्वात्रिंशत्तमीं षट्त्रिंशिकामाह—

इगहियतीसविहाणं, सिद्धगुणाणं च पंच नाणाणं । अणुकित्तणेण सम्मं, छत्तीसगुणो गुरू जयउ ॥३३॥

व्याख्या—सुगमैव । नवरं एकत्रिंशत् सिद्धगुणाः संस्थानाद्यभावलक्षणाः । यदाह—"पडिसेहणसंठाणे, वण्ण गंध रस फासवेए य । पणपणदुपणट्ठतिहा, इगतीसमकायसंगरुहा ॥ १ ॥" अकायोऽशरीरः१, असङ्गः सङ्गवर्जितः२, अरुहोऽजन्मा३, एभिः सहैकत्रिंशद्भवन्ति । तथा चोक्तम्—"से न दीहे१, न वट्टे२, न तंसे३, न चउरंसे४, न परिमंडले५, न किण्हे६, न नीले७, न लोहिए८, न हालिद्दे९, न सुकिल्ले१०, न सुरभिगंधे११, न दुरभिगंधे१२, न तित्ते१३, न कडुए१४, न कसाए१५, न अंबिले१६, न महुरे१७, न कक्कडे१८, न मउए१९, न गुरुए२०, न लहुए२१, न सीए२२, न उण्हे२३, न निद्धे२४, न लुक्खे२५, न संगे२६, न रुहे२७, न काए२८, न इत्थी२९, न पुरिसे३०, न नपुंसे३१ । अहवा कम्मे—"नवदरिसणंमि चत्ता-रि आउए पंच आइमे अंते । सेसे दो दो भेया, खीणभिलावेण इगतीसं ॥ १ ॥" ज्ञानपञ्चकं आभिनिबोधिकादिकम् । यदाह—"आभिणिबोहियनाणं, सुअनाणं चेव ओहिनाणं च । तह मणपज्जवनाणं, केवलनाणं च पंचमयं ॥ १ ॥ एतद्विवरणं यथा—अर्थाभिमुखो नियतो बोधोऽभिनिबोधः, आभिनिबोध एव आभिनिबोधिकम्, इकणि, तच्च तत् ज्ञानं चेति समासः । उत्पन्नाविनष्टार्थग्राहकं सांप्रतकालविषयं अवग्रहाद्यष्टाविंशतिभेदभिन्नं आत्मप्रकाशकं

१ अलब्धविस्तार ॥ २ "सुक्को" इत्यपि । ३ अकायत्व असङ्गत्वं अरुहत्वम् ॥

आभिनिबोधिकं ज्ञानं, मतिज्ञानमित्यपरपर्यायम् । तथा श्रूयते इति श्रुतं शब्दात्मकं, श्रुतं च तज् ज्ञानं चेति श्रुतज्ञानम् । उत्पन्नानुत्पन्नाविनष्टार्थग्राहकं त्रिकालविषयं अङ्गानङ्गादिभेदभिन्नं इति स्वपरप्रकाशकं श्रुतज्ञानमिति । यत उक्तम्—"सुअनाण महिड्ढीयं, केवलं तयणंतरं । अप्पणो य परेसिं च, जम्हा तं[2] पवियौहियं ॥ १ ॥" 'चः' समुच्चये, 'एवः' अवधारणे । अवधीयतेऽनेनेत्यवधिः, स च ज्ञानं चेति अवधिज्ञानं, इदमप्युत्पन्नानुत्पन्नविनष्टार्थग्राहकं त्रिकालविषयं अनुगाम्यादिषड्भेदभिन्नं अवधिज्ञानम् । तथा परिः सर्वतो भावे अवनं अवः गमनं वेदनं वा, ततः पर्यवः, मनसि मनसो वा पर्यवः, स एव ज्ञानं मनःपर्यवज्ञानम् । मनुष्यक्षेत्रवर्त्तिसंज्ञिपञ्चेन्द्रियद्रव्यमनोगतभावविज्ञानविषयं, तच्च ऋद्धिप्राप्ताप्रमत्तसंयतसम्यग्दृष्टिपर्याप्तसंख्यातायुष्ककर्मभूमिकगर्भव्युत्क्रान्तिकमनुष्याणामेव संभवि, नैतद्विपरीतानामिति, ऋजुविपुलमतिभेदभिन्नमिति । केवलमसहायं मत्यादिज्ञाननिरपेक्षं, केवलं च तज् ज्ञानं चेति केवलज्ञानं सकललोकालोकप्रकाशकं, तच्च पञ्चमं पञ्चमसंख्यात्मकम् । इति गाथार्थः ॥ ३३ ॥

अथ त्रयस्त्रिंशत्तमीं षट्त्रिंशिकामाह—

तह बत्तीसविहाणं, जीवाणं रक्ख[3]णंमि कयचित्तो । जियचउव्विहोवसग्गो, छत्तीसगुणो गुरू जयउ ॥३४॥

व्याख्या—उत्तानार्थैव । द्वात्रिंशद्विधा जीवाः, भूजलानलानिलानन्तवनस्पतिरूपाः पञ्च पञ्चापि सूक्ष्मबादरभेदाभिन्नत्वाद्दश, ते च सप्रत्येकवनस्पतिका एकादश, तेऽपि द्वित्रिचतुरिन्द्रियाऽसंज्ञिसंज्ञियुताः षोडश, ते च षोडशापि पर्याप्तापर्याप्तभेदभिन्नत्वाद् द्वात्रिंशदिति । तथा चाह—"सुहुमियरभूजलानलवाउवणणंत दस सपत्तेया । बितिचउसन्नियरजुया

१ घ–पुस्तके—"–प्नविन–" इत्यपि । २ तद् प्रकाशकतया प्रव्याहृयातम् । ३ पविगासगं । ४ स्फुटार्थेव ॥

सोलस पज्जेयर दुतीसं ॥ १ ॥ " चतुर्विधोपसर्गास्तु देवकृतमानवकृततिर्यक्कृतात्मसंवेदनलक्षणाः । तत्र देवकृतोपसर्गश्च-तुर्धा, हास्याद्वा रागाद्वा द्वेषाद्वा विमर्शाद्वा। तत्र हास्याद् व्यन्तरीकृतोपसर्ग ईडरीक्षुल्लकस्येव । रागात् स्नेहरागात् सीतेन्द्रकृतः श्रीरामचन्द्रस्येव । प्रद्वेषात् सङ्गमकृतः श्रीवर्धमानस्येव । विमर्शाद् अश्रद्धानपरामरकृतो नन्दिषेणस्येव ॥ तथा मानवकृतो-पसर्गोऽपि चतुर्धा, हास्याद्वा रागाद्वा द्वेषाद्वा विमर्शाद्वा । तत्र हास्याद्वेश्यासुताकृतः क्षुल्लकस्येव । रागात्कोशाकृतः श्रीस्थूलभ-द्रस्येव। प्रद्वेषात्सोमिलकृतो गजसुकुमालस्येव । विमर्शाद्भूपतिकारितो गजाधिरूढमहामात्रोत्पादितत्रासक्रमत्यक्तकतिचिच्चीवराया वृद्धार्यिकाया इव ॥ तिर्यक्कृतोपसर्गोऽपि चतुर्धा, भयाद्वा प्रद्वेषाद्वा आहारहेतोर्वा अपत्यालयसंरक्षणार्थं वा । तत्र भयान् म-ण्डलकुण्डलिप्रभृतिकृतो भवति इति सुप्रतीतमेव । प्रद्वेषाच्चण्डकोशिकसर्पकृतो भगवद्वीरस्येव । आहारहेतोर्व्याघ्रीकृतः सुको-शलस्येव । अपत्यालयसंरक्षणार्थं गोसिंहादिकृतो भवतीत्यपि सुप्रतीतमेव ॥ तथाऽऽत्मसंवेदनोपसर्गोऽपि चतुर्धा, सङ्घट्टनाद्वा, प्रपतनाद्वा, स्तम्भनाद्वा, लेशनाद्वा । तत्र संघट्टनात्स्वयमेवाक्षिरजोमलनादिकृतः स्यादिति । प्रपतनाद्भ्रश्यत्पादस्य सहसालग्न-गाढप्रहारस्येव । स्तम्भनान्मूर्च्छितवातप्रयोगक्षणस्तब्धीभूतहस्तपादादेरिव । लेशनाद्गाढरोगकर्शिताङ्गभाग्यस्येव ॥ अन्ये तु देवकृतोपसर्गभेदेषु रागाद्वेति पदं परिहृत्य चतुर्थं पदं विमर्ष (र्श) प्रद्वेषादिद्वित्रिसंयोगसंभवं पठन्ति । तथा मानवकृतोपसर्ग-भेदेष्वपि रागाद्वेति पदं परिहृत्य कुशीलप्रतिसेवनाख्यं चतुर्थं पदं वदन्ति इति । तथा चोक्तम्—" उवसज्जणमुवसग्गो, तेण तओ वाऽवसज्जए जम्हा । सो दिव्वमणुयतेरिच्छआयसंवेयणाभेओ ॥ १ ॥ हासप्पओसवीमंसुभयपयभेयओ भवे दिव्वो । एयं चिय माणुस्सो, कुसीलपडीसेवण चउत्थो ॥ २ ॥ तिरिओ भयप्पओसा—हारावचाइरक्खणत्थं वा । घट्टणथंभणपवडण—

१ व—पुस्तके—" चतुर्विधः " इत्यपि ॥

लेसणओ वाऽऽयसंवेओ ॥ ३ ॥" इति गाथार्थः ॥ ३४ ॥

अथ चतुस्त्रिंशत्तमीं षट्त्रिंशिकामाह—

बत्तीसदोसविरहिय–वंदणदाणस्स[3] निच्चमहिगारी। चउविहविगहविरत्तो, छत्तीसगुणो गुरू जयउ ॥३५॥

व्याख्या—कण्ठ्या । नवरं द्वात्रिंशद् वन्दनकदोषाः, अनादृतादयः । यदाह—" अणाढियं१ च थद्धं२ च, पविद्धं३ परिपिंडियं ४ । टोलगइ५ अंकुसं६ चेव, तहा कच्छभरिंगियं ७ ॥ १ ॥ मच्छुव्वत्तं८ मणसा, पउट्ठं९ तह य वेइयावद्धं १० । भयसा ११ चेव भयंतं१२, मित्ती१३ गारव१४ कारणा१५ ॥ २ ॥ तेणियं१६ पडिणियं१७ चेव, रुट्ठं१८ तज्जियमेव१९ य । सढं२० च हीलियं२१ चेव, तह विप्पलिउंचियं२२ ॥ ३ ॥ दिट्ठमदिट्ठं२३ च तहा, सिंगं२४ च करमोयणं २५। आलिद्ध२६ मणालिद्धं २७, ऊणं२८ उत्तरचूलियं२९ ॥ ४ ॥ मूयं३० च ढड्ढरं३१ चेव, चुडुलियं च अपच्छिमं३२ । बत्तीसदोसपरिसुद्धं, किइकम्मं पउंजए ॥ ५ ॥ आयरकरणं आढा, तव्विवरीयं अणाढियं होइ । दव्वे भावे थद्धो, चउभंगो दव्वओ भइओ ॥ ६ ॥ पव्विद्धमणुवयारं, जं अप्पंतो[1]णिजंतिओ होइ । जत्थ व तत्थ व उज्झइ, कयकिच्चोऽवक्खरं[2] चेव ॥७॥ संपिंडिए वि वंदइ, परिपिंडियवयणकरणओ वावि । टोलु व्व उप्फिडंतो, ओसक्कहिसक्कणं कुणइ ॥ ८ ॥ उवगरणे हत्थंमि व, घित्तु निवेसेइ अंकुसं चेव । ठियचिट्ठरिंगणं[3] जं, तं कच्छभरिंगियं नाम ॥ ९ ॥ उट्ठिंत निवेसंतो, उव्वत्तइ मच्छउ[4] व्व जलमज्झे । वंदिउकामो वऽन्नं, झसु व्व परिअत्तए तुरियं ॥ १० ॥ अप्पपरपच्चएणं, मणप्पओसो अणेगउट्ठाणो[5] । पंचेव वेइयाइं, भयंति निज्जूहणाईयं ॥ ११ ॥ भयइ व भइस्सइत्ति[6] य, इय वंदइ न्होरयं[7] निवेसंतो । एमेव य मित्तीए,

---

१ वदनामर्षयन् नियन्त्रित इव भवति । २ अवकर इव कचवर इव । ३ स्थिरोपविष्ट । ४ मत्स्य इव । ५ निष्काशनादिकम् । ६ ब–पुस्तके—" भयस्सइत्ति" इत्यपि । ७ आशाम् ॥

गारवसिक्खाविणीओहं ॥ १२ ॥ नाणाइतिगं मुत्तुं, कारण इहलोगसाहगं होइ । पूयागारवहेउं, नाणग्गहणेवि एमेव ॥ १३ ॥ आयरतरेण हंदी, वंदामि तेण पच्छ पणइस्स । वंदणगमुल्लभावो, न करिस्सइ मे पणयभंगं ॥ १४ ॥ हौउं परस्स दिट्ठिं, वंदंतो तेणियं हवइ एयं । तेणो विव अप्पाणं, गूहइ उब्भावणा मा मे ॥ १५ ॥ आहारस्स उ काले, नीहारस्सावि होइ पडिणीयं । रोसेण धमधमंतो, जं वंदइ रुट्ठमेयं तु ॥ १६ ॥ नवि कुप्पसि न पसीयसि, कट्ठसिवो चेव तज्जियं एयं । सीरांगुलिमाईहिं, तज्जेइ गुरुं पणिवयंतो ॥ १७ ॥ वीसंभट्ठाणमिणं, सब्भावजढे सढं हवइ एयं । कवडंति कयवयंति य, सढयावि य हुंति एगट्ठा ॥ १८ ॥ गणिवायगजिट्ठज्जत्ति हीलियं किं तुमे पणिवएणं । दरवंदियंमि वि कहं, करेइ पलिउंचियं एयं ॥ १९ ॥ अंतरिओ तमसे वा, न वंदइ वंदई उ दीसंतो । एवं दिट्ठमदिट्ठं, सिंगं पुण कुंभपासेहिं ॥ २० ॥ करमिव मन्नइ दिंतो, वंदणयं आरिहंतियकरोत्ति । लोइयकराओ मुक्का, न मुच्चिमो वंदणकरस्स ॥ २१ ॥ आलिद्धमणालिद्धं, गुरुपयसीसे य होइ चउभंगो । वयणक्खरेहिं ऊणं, जहण्णकाले [3]विसेसेइ ॥ २२ ॥ दाऊण वंदणं मत्थएण वंदामि चूलिया एसा । मूउ व्व सद्दरहिओ, जं वंदइ मूयगं तं तु ॥ २३ ॥ ढड्ढरसरेण जो पुण, सुत्तं घोसेइ ढड्ढरं तमिह । चुडुलिं व गिण्हिऊणं, रयहरणं होइ चुडुलीयं ॥ २४ ॥ वत्तीसदोसपरिसुद्धं, किइकम्मं जो पउंजइ गुरूणं । सो पावइ निव्वाणं, अचिरेण विमाणवासं वा ॥ २५ ॥ किइकम्मंपि कुणंतो, न होइ किइकम्मनिज्जराभागी । पणवीसामन्नयरं, साहू ठाणं विराहंतो ॥ २६ ॥ " विकथा चतुर्विधा स्त्रीभक्तदेशराजकथारूपा सुप्रती-

१ वञ्चयित्वा । २ अपभ्राजना । ३ व-पुस्तके-" विसेसेहिं " इत्यपि ॥ ४ ड-पुस्तके-" चुडुलियं त तु " इत्यपि । ५ व-पुस्तके-" पउजए " इत्यपि । ६ व-पुस्तके-" वत्तीसामन्नयर " इत्यपि ॥

तैव । यत्प्रतिक्रमणसूत्रम्—"पडिक्कमामि चउहिं विकहाहिं,—इत्थीकहाए भत्तकहाए देसकहाए रायकहाए ।" अन्यत्रापि पठ्यते—"सातन्वी सुभगा मनोहररुचिः कान्तेक्षणा भोगिनी, तस्या हारि नितम्बबिम्बमथवा विप्रेक्षितं सुभ्रुवः । धिक् तामुष्ट्रगतिं मलीमसतनुं काकस्वरां दुर्भगा–मित्थं स्त्रीजनवर्णनिन्दनकथा दूरेऽस्तु धर्मार्थिनाम् ॥ १ ॥ अहो ! क्षीरस्यान्नं मधुरमधुरं चाज्यखण्डान्वितं चेद्, रसः श्रेष्ठो दध्नो मुखसुखकरं व्यञ्जनेभ्यः किमन्यत् । न पक्वान्नादन्यद्रमयति मनः स्वादु ताम्बूलमेकं, परित्याज्या प्राज्ञैरशनविषया सर्वदैवेति वार्ता ॥ २ ॥ रम्यो मालवकः सुधान्यजनकः काञ्च्यास्तु किं वर्ण्यते ?, दुर्गा गूर्जरभूमिरुद्भटभटा लाटाः किराटोपमाः । [1]काश्मीरे वरमुष्यतां सुखनिधौ स्वर्गोपमाः कुन्तला, वर्ज्या दुर्जनसङ्गवच्छुभधिया दैशी कथैवंविधा ॥ ३ ॥ राजाऽयं रिपुवारदारणसहः क्षेमङ्करश्चौरहा, युद्धं भीममभूत्तयोः प्रतिकृतं साध्वस्य तेनाधुना । दुष्टोऽयं म्रियतां करोतु सुचिरं राज्यं ममाप्यायुषा, भूयो बन्धनिबन्धनं बुधजनै राज्ञां कथा हीयताम् ॥ ४ ॥" इति गाथार्थः ॥ ३५ ॥

अथ पञ्चत्रिंशत्तमीं षट्त्रिंशिकामाह—

तित्तीसविहासायणं[३३]–वज्जणजुग्गो य वीरिआयारं । तिविहं अणिगूहंतो, छत्तीसगुणो गुरू जयउ ॥३६॥

व्याख्या—सुगमैव । नवरं त्रयस्त्रिंशदाशातना गुरुपुरोगमनादिकाः । यदाह—"पुरओ पक्खाऽसन्ने गंता३ चिट्ठण६ निसीयणा९ऽऽयमणे१० । आलोअण११पडिसुणणे१२,पुव्वालवणे१३य आलोए१४ ॥१॥ तह उवदंस१५ निमंतण१६, खद्धा१७ ययणे१८ तहा अ पडिसुणणे१९ । खद्धत्ति अ२० तत्थगए२१, किं२२ तुम२३ तज्जाय२४ नोसुमणे२५ ॥ २ ॥

१ ब–पुस्तके "काश्मीरे वरमुख्यता" इत्यपि ॥

नोसरासि२६ कहं छित्ता२७, परिसं भित्ता२८ अणुट्टियाइ कहे२९ । संथारपायघट्टण३०, चिट्ठु३१ च्च३२ समासणे३३ यावि ॥.३ ॥" आसां व्याख्या—गुरोः पुरतः पार्श्वयोरासन्ने च पृष्ठतः प्रत्येकं गमनं स्थानं निषीदनं च कुर्वतः ९ । गुरोः पूर्वे बहिर्गतेनाचमनम् १० । पूर्वं गमनागमनालोचनम् ११ । रात्रौ कः स्वपिति को जागर्ति, इति पृच्छति गुरौ जाग्रतोऽप्यप्र-तिश्रवणम् १२ । साध्वादेरागतस्य प्रथममालापनम् १३ । भिक्षां शैक्षकस्य कस्यचिदालोच्य पश्चाद्गुरोरालोचनम् १४ । एव-मुपदर्शनम् १५ । निमन्त्रणं च१६ । गुरुमनापृच्छ्य यथारुचि साधुभ्यः 'खद्धति' प्रचुरं ददतः १७ । गुरोर्यत्किंचिद्दत्त्वा स्वयं स्निग्धमधुराद्युपभोगोऽदनम् १८ । अप्रतिश्रवणं रात्रिवच्छेपकालेऽपि १९ । 'खद्धत्ति' गुरुं प्रति निष्ठुरं भणनम् २० । 'तत्थगयत्ति' तत्रस्थस्यैव प्रतिवचनं ददतः २१ । गुरुं प्रति किमिति भणनम् २२ । त्वंकारश्च २३ । गुरुणा इदं कुरु इत्यु-क्तो यूयमेव किं न कुरुध्वं, इति तथावचनम् २४ । गुरौ कथां कथयति उपहतमनस्त्वम् २५ । न स्मरसि त्वं नायमर्थः संभ-वति २६ । स्वयं कथा[1]कथनेन कथाछेदनम् २७ । अधुना भिक्षावेला, इत्यादिमिषैः पर्षद्भेदनम् २८ । अनुत्थितायां पर्षदि सविशेषकथनम् २९ । गुरुशय्यादेः पादेन घट्टनम् ३० । ' चिट्ठत्ति ' गुरुशयनादौ निषीदनादि ३१ । एवमुच्चासने, समासनेऽपीति ३२ ॥ तथा त्रिविधं वीर्याचारं मनोवचनकायवीर्याचारलक्षणं सुप्रतीतमेव । इति गाथार्थः ॥ ३६ ॥

अथ षट्त्रिंशत्तमीं षट्त्रिंशिकामाह—

गणिसंपयट्ठ[32]चउविह, बत्तीसं तेसु निच्चमाउत्तो । चउविहविणयपवित्तो, छत्तीसगुणो गुरू जयउ ॥३७॥

व्याख्या—गणिसंपदस्तावदष्टाष्टसंख्याकाः ताः प्रत्येकं चतुर्विधाः इति द्वात्रिंशत्, तेषु द्वात्रिंशद्गणिसंपद्भेदेषु नित्य-

१ ब- स्तके—"१ यं कथनेन" स्य पे

मायुक्तः, तथा चतुर्विधविनयप्रवृत्तः, इति षट्त्रिंशद्गुणो गुरुर्जयत्विति संक्षेपार्थः । विस्तरार्थस्त्वयम्—आचारसंपत् १, श्रुतसंपत् २, शरीरसंपत् ३, वचनसंपत् ४, वाचनासंपत् ५, मतिसंपत् ६, प्रयोगमतिसंपत् ७, संग्रहपरिज्ञासंपत् ८,[1] इत्येता अष्टौ गणिसंपदः । तत्र चाचारसंपच्चतुर्धा—चरणसप्ततियुक्तता १, निर्मदता २, अनियतविहारिता ३, अचञ्चलेन्द्रियत्वं ४ चेति । तथा श्रुतसंपच्चतुर्धा—युगप्रधानागमज्ञता १, परिचितसूत्रार्थता २, उत्सर्गादिवेदित्वम् ३, उदात्तादिपटुवर्णोच्चारित्वम् ४ । तथा शरीरसंपच्चतुर्धा—समचतुरस्रसंस्थानता १, संपूर्णाङ्गोपाङ्गता २, अविकलेन्द्रियत्वम् ३, तपःपरीषहादेः सहिष्णुता ४ चेति । तथा वचनसंपच्चतुर्धा—अनाहतप्रतिभात्वम् १, मधुरवाक्यता २, निर्विकारवचनता ३, स्फुटवचनता ४ चेति । तथा वाचनासंपच्चतुर्धा—योग्यायोग्यपात्रज्ञता १, पूर्वस्मिन् सूत्रार्थजाते परिणतेऽपरसूत्रार्थदानम् २, सूत्रं प्रति निर्यापणमुत्साहनम् ३, अर्थं प्रति निर्वाहित्वं ४ चेति । तथा मतिसंपच्चतुर्धा—अवग्रहोऽव्यक्तग्रहणम् १, इहा विमर्शः २, अपायो निश्चयः ३, धारणा अविस्मारणं ४ चेति । प्रयोगमतिर्वादबुद्धिः, साऽपि चतुर्धा—स्वशक्तिपरिज्ञानम् १, पुरुषपरिज्ञानम् २, स्वपरानुकूलक्षेत्रपरिज्ञानम्३, स्वपरानुकूलराजादिवस्तुविज्ञानं४ चेति। संग्रहपरिज्ञासंपच्चतुर्धा—गणविहारयोग्यक्षेत्रादिपरीक्षणम्१, भद्रकादीनामुपदेशतो गणचिन्तादौ स्थिरीकरणम्२, स्वाध्यायाङ्गानां पुस्तकादीनां संगच्छर्नम्३, तपोऽनुष्ठानादौ शैक्षकादीनां यथायथायोग्यकृत्यज्ञता४ चेति । एवं गणिसंपद्भेदा द्वात्रिंशदिति । तथाऽऽचारश्रुतविक्षेपदोषप्रतिघातभेदभिन्नत्वाद् विनयोऽपि चतुर्धा । तत्राचारविनयः स्वस्य परस्य वा संयमतपोगणप्रतिमाविहारादिसामाचारीसाधनलक्षणः१, श्रुतविनयः सू-

१ न-पुस्तके-" वर्णोच्चारणम् " इत्यपि । २ न-पुस्तके-" पूर्वसूत्रार्थजाते " इत्यपि । ३ न-पुस्तके-" निर्वाहकत्वं " इत्यपि । ४ नात्र चिन्तार्थता । ५ न-पुस्तके-" परपुरुषपरिज्ञानम् " इत्यपि ॥ ६ ड-पुस्तके-" राज्यादि " इत्यपि । ७ न-पुस्तके-" गणसहिताहार " इत्यपि । ८ " समो गच्छादनटि " । ९ न-पुस्तके-"तत्र चाचारः"॥

त्रार्थोभयभावरहस्यानां दानग्रहणप्रेरणोपबृंहणादिभिः२, विक्षेपविनयो मिथ्यात्वतो गार्हस्थ्यतः प्रमादाद्वा विक्षिप्य तदुत्तरभावेषु स्थापनमिति३, तद्दोषप्रतिघातविनयो विषयकषायादिदोषप्रतिघातनेनेति ४। एतदर्थसूचिकाः पूर्वर्षिप्रणीतगाथाश्चात्र—"आयार१ सुय२ सरीरे३, वयणे४ वायण५ मई६ पओगमई७। एएसु संपया खलु, अट्ठमिया संगहपरिण्णा८ ॥१॥ चरणजुओ१ मयरहिओ२, अनिययवित्ती३ अचंचलो४ चेव। जुग१ परिचय२ उस्सग्गो३, उदत्तघोसाइ विन्नाया४ ॥ २ ॥ चउरंस१ अंकुटाई२, वहिरत्तणवज्जिओ३ तवे सत्तो४। वाइ१ महुरत्त२ निम्मिय३, फुडवयणो४ संपया वयणे ॥ ३ ॥ जोगे१ परिणयवयणो२, निज्जवया३ वायणाइ निव्वहणे४। उग्गह१ ईह२ अवाया३, धारण४ मईसंपया चउरो ॥ ४ ॥ सत्ती१ पुरिसं२ खित्तं३, वत्थुं४ नाउं पउंजए वायं। गणजोगं१ संसत्तं२, सज्झाए३ सिक्खणं४ जाण ॥ ५ ॥ आयारे सुअविणए, विक्खेवे चेव होइ वोद्धव्वे। दोसस्स परिग्घाए, विणए चउद्देस पडिवत्ती ॥ ६ ॥" इति गाथार्थः ॥ ३७ ॥

अथ सूरिवरगुणानामनन्तत्वं स्वस्य चात्यन्तं सामर्थ्याभावं दर्शयितुमाह—

जइवि हु सूरिवराणं, सम्मं गुणकित्तणं करेउं जे। सक्कोवि नेव सक्कइ, कोऽहं पुण गाढमूढमई ॥३८॥

व्याख्या—कण्ठ्या ॥ ३८ ॥ किं च—

तहवि हु जहासुआओ, गुरुगुणसंगहमयाउ भत्तीए। इय छत्तीसं छत्तीसियाउ भणियाउ इह कुलए ॥३९॥

व्याख्या—सुबोधैव ॥ ३९ ॥ अथैतद्गुरुगुणषट्त्रिंशिकासंग्रहगाथाकुलकार्थानुसारिणां प्राणिनामाशीर्वचनमाह—

मायुक्तः, तथा चतु... नयप्रवृत्तः, इ... प... शद्गुण गुरु... त्वात

... प्रयोगमतिसंपत ७ संग्रहपरिज्ञासंपत ८.' इत्येता

सिरिवियरसेणसुहगुरु—सीसेणं विरइयं कुलगमेयं। पढिऊणमसढभावा, भव्वा पावंतु कल्लाणं ॥४०॥

व्याख्या—सुगमैव ॥ ४० ॥

॥ समाप्ता चेयं सद्गुरुगुणषट्त्रिंशत्षट्त्रिंशिकाकुलकदीपिका ॥

श्रीमद्बृहद्गच्छपयोजहंसः, समस्तवादीन्द्रशिरोऽवतंसः। प्रज्ञापराभूतसुरेन्द्रसूरिर्जीयाज्जगत्यां गुरुदेवसूरिः ॥ १ ॥

तद्गच्छे स्वच्छमनाः, समजनि जयशेखरो गुरुः श्रीमान्। तत्पट्टगगनभानुः, सूरिः श्रीवज्रसेनाह्वः ॥ २ ॥

तत्पट्टनायकाः श्री—हेमतिलकसूरयस्तदादेशात्। श्रीरत्नशेखराख्यः, शिष्यो लिखति स्म विवृतिमिमाम् ॥ ३ ॥

॥ ग्रंथाग्रम् १३०० ॥

॥ अर्हम् ॥

अद्यावधि श्रीआत्मानन्द-ग्रन्थरत्नमालायां प्रकाशितानां ग्रन्थानां

सूचिका ।

संख्या.	ग्रन्थनामानि.
१	समवसरणस्तवः सावचूरिकः ।
२	क्षुल्लकभवावलिप्रकरणं सावचूरिकम् ।
३	लोकनालिकाद्वात्रिंशिका सावचूरिका ।
४	योनिस्तवः सावचूरिकः ।
५	कालसप्ततिका सावचूरिका ।
६	देहस्थितिस्तव-लघ्वल्पबहुत्वे सावचूरिके ।
७	सिद्धदण्डिकास्तवः सावचूरिकः ।
८	कायस्थितिस्तोत्रं सावचूरिकम् ।
९	भावप्रकरणं स्वोपज्ञावचूरिकम् ।
१०	नवतत्त्वप्रकरणं-भाष्येण विवरणेन च भूषितम् ।
११	विचारपञ्चाशिका सावचूरिका ।
१२	बन्धषट्त्रिंशिका सावचूरिका ।
१३	परमाणुखण्डषट्त्रिंशिका पुद्गलषट्त्रिंशिका-निगोदषट्त्रिंशिका सवृत्तिका ।
१४	श्रावकव्रतभङ्गप्रकरणं सावचूरिकम् ।
१५	देववन्दन-गुरुवन्दन-प्रत्याख्यान-भाष्यं सावचूरिकम् ।
१६	सिद्धपञ्चाशिका सावचूरिका ।
१७	सवृत्तिकं अन्नायउञ्छ-कुलकम् ।
१८	विचारसप्ततिका सवृत्तिका ।
१९	सावचूरिकं अल्पबहुत्वगर्भितं महावीरस्तवनं, तथा सावचूरिकं पञ्चदण्डकस्तोत्रम् ।

मायुक्तः, तथा चतुर्विधविनयप्रवृत्तः, इ पद् शङ्कुणा गुरु य त्वात सक्षप थ.
तत्संपत २. शरीरसंपत ३. वचनसंपत ४. वाचनासंपत ५, मतिसंपत् ६, प्रयोगमतिसंपत् ७, संग्रहपरिज्ञासंपत् ८, इत्येता

२० पञ्चसूत्रं सटीकम् ।
२१ जम्बूस्वामी चरितम् ।
२२ रत्नपालनृपकथानकम् ।
२३ सूक्तरत्नावली ।
२४ मेघदूतसमस्यालेखः ।
२५ चेतोदूतम् ।
२६ पर्युषणापर्वाष्टाह्निकाव्याख्यानम् ।
२७ चम्पकमालाकथा ।
२८ सम्यक्त्वकौमुदी ।
२९ श्राद्धगुणविवरणम् ।
३० धर्मरत्नप्रकरणं सटीकम् ।
३१ *कल्पसूत्रं सुबोधिकाव्याख्यया समेतम् ।
३२ *उत्तराध्ययनसूत्रं सटीकम् ।
३३ उपदेशसप्ततिका ।
३४ कुमारपालप्रबन्धः ।
३५ आचारोपदेशः ।
३६ रोहिणीअशोकचन्द्रकथा ।
३७ गुरुगुणषट्त्रिंशत्षट्त्रिंशिकाकुलकं दीपिकाख्यविवृत्तिसमेतम् ।

उपरिलिखिता एते ग्रन्थाः प्रायेण प्रवर्त्तकश्रीमन्मुनिकान्तिविजयचरणाब्जचञ्चरीकायमाणैः श्रीमच्चतुरविजयमुनिभिर्महता प्रयासेन संशोधिताः, अस्माभिश्च तत्तच्छ्रेष्ठिमहोदयानां द्रव्यसाहाय्येन मुम्बईस्थनिर्णयसागरयन्त्रालये सुप्रबन्धेन प्रकाशिताः । एते च मुनिवरेभ्यः सङ्घसंबन्धिजैनपुस्तकभाण्डागारेभ्यश्च पोष्टव्ययमात्रप्रेषणेनामूल्यं समर्प्येरन् । तदितरेभ्यः समुचितालपमूल्येन प्रेषयिष्याम इति निवेदयति सविनयम्—

श्रीजैनआत्मानन्दसभा, भावनगर.

* एतच्चिन्हाङ्कितौ ग्रन्थौ स्तोककालेन प्रकाटौ भविष्यत. ।

॥ समाप्तमिदं दीपिकासमेतं गुरुगुणषट्-
त्रिंशत्षट्त्रिंशिकाकुलकम् ॥